मौ नीदत्वा शिरसि दीपकं ॥ सौवर्णराजते पात्रे ताम्रेऽलांबुमये तथा तैलेन वर्तिका देया महारजनरंजिता ॥
॥ समाहितमना भूत्वा दत्वा शिरसि दीपकं भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत ॥ नमस्ते रुद्ररूपाय रसा

नां पतये नमः वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते ॥ जलोपरि तरद्दीपः स्नात्वा संतर्प्य देवताः तर्केन च
स्यते यावत्तावत्स्नानं समाचरेत ॥ एवं प्रयोगे वे स्नानं सर्वकामफलप्रदं रूपसौभाग्यजननं सर्वरोगनिवा
रणं ॥ सूर्यग्रहे नान्ततः कुर्यात् तदुक्तैः पूजनसाधनैः पीठादौ रथमुद्दिश्य सप्तसप्तिसमन्वितं ॥ सवालखिल्यं
सानूरमेकचक्रं च भावितं सहस्रकिरणं सूर्यं विलिख्य तत्र सायुधं ॥ बाडवो रूपवारे सुर पूजयेद्वाय यथावि
धि तदग्रे सप्तधान्यानि फलानि च निवेदयेत ॥ करवीरैर्नवापुष्पैर्दीपैर्लोहितचंदनैः तांबूलैर्दक्षिणाभिश्च
सूर्यमंत्रैः प्रपूजयेत ॥ अनेन पूजयेत्कस्मात्तस्य ये दक्षिणाहिमाः सर्वान्कामानवाप्नोति नरो नारी विशेष
तः ॥ तद्दिने तिलपात्राणां दानमुक्तं महाफलं फलदानं च विप्रेभ्यः सद्य पापक्षयो भवेत् ॥ कूष्मांडदानम
त्रोक्तं च सर्वदुःखनिवारणं सौभाग्यपुत्रपौत्रादि पोषणं रवितोषणं ॥ प्रवालमणिमुक्तादीं वस्त्रधान्यफला
न्वितं घृताक्तं तिलसंयुक्तं स्वर्णरौप्यादिपूरितं ॥ सहेतं दद्याद्यथाविधि नारी वा पुरुषो वा
पि दद्यात् स्नात्वा सदक्षिणं ॥ यावंति बीजानि संति तस्य तावद्वर्षसहस्रकं कूष्मांडदो तिष्ठते नवी श्रीतः स्वर्गे वसेन्नरः
॥ संक्रांतावयने माघे सप्तम्यां च विशेषतः कूष्मांडं गोदानसदृश्यफलदं स्मृतं ॥ ब्राह्मणान् भोजयेद्

DR BHAU DAJI

वि धा १

त्या दंपतीं च तथार्चयेत् कुर्यात्मा माधवस्तेन कर्मणा संप्रसीदति ॥ एवं विधिवत्सर्वं सांगमिकं विधिं स्ना
प्र.शा. त्वाष्टम्यां ततः कुर्यात् सतिलं भीष्मतर्पणं ॥ ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय ने जलं संवत्सरकृतं तेषां पु
२६ ण्यं नश्यति सत्तमाः ॥ भीष्मः शांतनयो वीरः सत्यवादी जितेंद्रियः आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रिं
यां ॥ वैयाघ्रपादगोत्राय सांकृतिप्रवराय च अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥ जीवत्पितापि क ५
र्तव्यं तर्पणं यम भीष्मयोः सव्येनैवापसव्येन द्वयोरपि हि कर्मतः ॥ एवं पत्र्यर्पणं कृत्वा ब्राह्मणान्भोजयेत्ततः
तस्य संततिविच्छेदो जायते न कदाचन ॥ एकादशी तु या शुक्ला साभीमद्वादशी स्मृता उपोष्य विधिवत्तस्यां
माधवं पूजयेन्नरः ॥ माघ्यां स्नानं तथा सम्यक् तर्पयित्वा देवताः तिलपात्राणि देयानि सुवर्णसहितानि
च ॥ ताम्रपात्रे स्थालीं जघन्यं परिकीर्तितं द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमोत्तमं ॥ स्वर्णमेकं जघन्यं स्या
त् द्विगुणं मध्यमं स्मृतं त्रिगुणं चोत्तमं प्रोक्तं मुनिभिस्तत्वदर्शिभिः ॥ ताम्रपात्रे तिलान्कृत्वा पलैः षोडशभिः क
ल्पिते सहिरण्यं स्वशक्त्या वा विप्राय प्रतिपादयेत् ॥ ताम्रपात्रं तिलैः पूर्णं प्रस्थमात्रैर्हि जायते सहिरण्यं ८ २६
च यो दद्यात् कृत्वा वित्तानुसारतः ॥ देवदेव जगन्नाथ वांछितार्थफलप्रद तिलपात्रं प्रदास्यामि तव संगे सं स्थि

तो हरं ॥ तिलाः पुण्याः पवित्राश्च सर्वपापहराः स्मृताः शुक्लाश्चैव तथा कृष्णा विष्णुगोत्रसमुद्भवाः
॥ यानि कानि च पापानि ब्रह्महत्यासमानि च तिलपात्रप्रदानेन तानि नश्यंतु मे सदा ॥ एवं यः कुरुते दानं ति
लपात्रस्य भक्तिमान् नाशमेष्यति विधं पापं वाङ्मनःकायसंभवं ॥ पूर्णिमायां तथा पेतं मणिमुक्ताप्रवालकं माघ्यां
दत्वा नरः पापमुक्तो वैकुंठमाप्नुयात् ॥ दंपती च तथा पूज्यौ मासे माधवप्रिये विप्रान्संभोज्य विधिवत्स्वयं भुं
जीत भक्तिमान् ॥ मेषराशौ यदा सौरिः सिंहे चैव बृहस्पतिः भास्करः श्रवणे चैव महामाघीति सा स्मृता ॥ महा
रमा पुण्या पि योषिता केवला बाहुनीश्वराः प्रयागे निश्चला येषां कलिता भूमिमंडले ॥ गंगायमुनयोर्मध्ये पुण्ये
यां त्रजाती मुखे दृष्टितं फलमाप्नोति दीपदानकृतो नराः ॥ यत्कृतं च कृतं तत्सर्वं तत्सर्वं मे फलसमं जायते ना
त्र संदेहो गुरुवाक्यान्मयोदितं ॥ एवं बोधु विशार्द्धला विशेष विधिनिर्णयः कथितोयं भवतीत्या माघस्नानफ
लप्रदः ॥ ॥ इति श्रीभविष्यपुराणे प्रयागमाहात्म्ये माघीयविशेषधर्मनिरूपणं नाम पंचाशत्तमोऽध्यायः ॥ ५०
॥ सूत उवाच ॥ वदाम्यथ मुनिश्रेष्ठा माघस्योद्यापने विधिं माघस्नानव्रतं येन सफलं जायते नृणां ॥ व्रतं कृत्वो
द्यापनं यो न कुर्यान्मोहतो नरः संपूर्णं न भवेत्तस्य तत्कृतं निष्फलं भवेत् ॥ व्रतवैकल्यमासाद्य रोगी चांधः प्रजा

यते तस्मादुद्यापनं कुर्याद्यथाशक्ति यथाविधि ॥ कालेन कृत्वास्तथा स्त्रीजा दरिद्राश्च नपुंसकाः जायंते वैध

अशु रान्ध्रका कुर्वंत्युद्यापनेन ये ॥ ... कथमुद्यापनं कार्यं माघस्नानव्रतस्य भो वदतः श्रद्धायांयेन पु ना

ण्यफलं भवेत् ॥ सूत उवाच ॥ यदा वित्तं तथा वित्तं स्त्रातीर्थं बलभाते पुण्यकालस्य पात्रं च तदोद्यापनमाचरेत्

॥ आदौ मध्ये तथा चांते कार्यमुद्यापनं शुभं तथापि ते प्रकर्तव्यं माघस्योद्यापनं नरैः ॥ माघशुक्ल चतुर्दश्यां

प्रातः स्नात्वा यथाविधि सर्वं नित्यमनुष्ठाय संकल्पं तु समाचरेत् ॥ माघस्नानस्य संपूर्त्यै वेणीमाधवतुष्टये उ

द्यापनं करिष्येऽहं माघस्नानव्रतस्य हि ॥ तद्दिने नियमी तिष्ठेत्सपत्नीकः सुबांधवः संभारानाहरेत्सर्वान्पूजोप

सीसमाहितः ॥ उपलिप्य च वेदिं देशे गोमातीर्थस्य कारयेत् विधाय मंडपं रम्यं कदलीस्तंभमंडितं ॥ तोरणैः फल

पुष्पैश्च वितानेन च भूषितं ... तन्मध्ये वेदिका कार्या ... लासम

... वेदी ... सर्वतोभद्रमंडितं ॥ एवं संभृतसंभारः सायंकाले सिते जलैः दीपान्यज्वाल्य द्विजो

द्विजानाहूय कर्मज्ञान्सपत्नीकः समाचरेत् ... आदौ विनायकं पूज्य पुण्याहं वाचयेत् ८७

तः ॥ ऋत्विजां वरणं कुर्यादाचार्यमेव वा सोवर्णी प्रतिमा कार्या वेणीमाधवयो ... त्रयस्त्रिंशद्द्य

४१ ॥

त्रिंशाद्दद्य वै का स्वशक्तितः तावंतः कलशाः कार्या यावंत्यः प्रतिमाः कृताः ॥ पिधानान्यपि तावंति वस्त्रा

णि त्रिंशद्दानि च ततः स्वयं सपत्नीक आचार्यो वा प्रवेदितः ॥ अव्रणान्स्थापयेन्मंत्रैः सर्वतोभद्रदेवताः स

पूज्योपरि तन्मंत्रैः कलशान्स्थापयेत्सुधीः ॥ तेषु प्रस्थापयेत् ... प्रथक् कृत प्राणप्रति

ष्ठाश्च प्रतिमाः स्थाप्य पूजयेत् ॥ पंचामृतेन ... षोडशोपचारकैः ... माधवं प्र

भुं ... नामपुष्पैर्धूपदीपैर्नानाविधैः ... दलैः ॥ पुष्पांजलिम

थो दत्वा मंत्रेणानेन भूयसा ... माधवं विभुं ॥ श्रीमाधव दयासिंधो भक्तकामप्र

वर्धन माघस्नानव्रतं मे ... नमः ॥ ... द्विजा ... प्रतिगृह्णीष्व ... कृतिवादित्र

गीताद्यैस्तां रात्रिमतिवाहयेत् ॥ ततः प्रभाते ... पंचोपचारैः संपूज्य माधवं

हवनं चरेत् ॥ ... मंडपवाह्ये ... तत्र संस्थापयेदग्निं ... वर्त्मना ॥ तदी

शान्यां ... अष्टोत्तरशतं चाष्टा

विंशतिर्वा ... जुहुयात्समिद्धतिलादिकं ॥ अष्टोत्तरसहस्रं च प्रातमष्टोत्तरं तु वा वेद

वेनतु मंत्रेण घृताक्तान् जुहुयात्तिलान् ॥ प्रणवाद्यैर्नमोंतैश्च वेणीमाधवनामभिः कृत्वा जयं मंडलस्थानां
प्र॰ पु॰ देवतानां च तद्धुनेत् ॥ ततः स्विष्टकृतं हुत्वा प्रायश्चित्ताहुतीस्तथा बलिदानं ततः कृत्वा पूर्णाहुतिमथो हु
९ नेत् ॥ प्रणीतानां विमोकादि श्रेयः संपाद्य दक्षिणां आचार्याय सवत्सां गां दद्याद्विपुलदक्षिणां ॥ संह
ज्याविहितान्देवानां धाद्यैरुपचारकैः अभिषिक्तो जलैर्मंत्रैः कृमिनिहत जनमाचरेत् ॥ विभूतिधारणं कृत्वा
प्रणम्याग्निं च देवताः विसर्जनं ततः कुर्यान्माधवं न विसर्जयेत् ॥ ऋत्विग्भ्यो न्यद्विजेभ्यश्च दक्षिणां भू
यसीं तथा दत्वा हवनसंपत्तिं वाचयित्वा निवेदयेत् ॥ अथापनस्य संपूर्त्यै वेणीमाधवतुष्टये दंपतीभोज
नं कार्यं प्रतिमासं स्वयात ततः ॥ आभाव्य ब्राह्मणं [illegible] दासविसिन्यमेव च दंपतीनां त्रयं भोज्यमेकं वाति
यतं भवेत् ॥ वस्त्रालंकरणैर्माल्यैर्भक्ष्यभोज्यैस्तथैव च ॥ तांबूलैर्दक्षिणाभिश्च तोषयेद्ब्राह्मणान्वती ॥
नानामंगलयुक्तानि दक्षिणासंयुतानि च तावद्दूर्पाणि देयानि विविष्टेभ्यः फलैः ॥ पूजयित्वा पुनर्देवं त्रि ९८
वेणीं च विशेषतः ततो वायनकं दद्यादाचार्याय सदक्षिणं ॥ मोदकास्त्रयस्त्रिंशत्कर्कराति लगर्भिताः भा
गत्रयं तिलानां स्यात्स्वतुर्थं शर्करांशकः ॥ साज्याश्च सहिरण्याश्च वंशपात्रकाः दिताः शुभाः देयास्ताचा

र्यवर्याय वायनार्थं च मंत्रतः ॥ एते वै मोदकास्तुभ्यं वायनार्थं निवेदिताः गृहाण त्वं तान्मम प्रीत्या मा
मुद्धर नमोस्तु ते ॥ माधवः प्रतिगृह्णाति माधवो वै ददाति च माधवस्तारको भाभ्यां माधवाय नमो नमः
॥ एवं वायनकं दत्वा ततो ह्याचार्यवर्यतः माधवं प्रार्थ्य मंत्रेण ततो भक्त्या विसर्जयेत् ॥ ब्राह्मणेभ्य
स्ततो देयाः कलशाः सपरिच्छदाः गृहस्थैः सकलशाम्बर्याय निवेदयेत् ॥ शंखचक्रगदापद्मधर
पीतांबराच्युत वेणीमाधव मां स्वामिन् शरणागतपालक ॥ मंत्रतंत्रक्रियाहीनं श्रद्धाभक्तिविवर्जि
तं मत्कृतो ह्यापनं कर्म कृपया सफलं कुरु ॥ एवमुक्त्वा कृतं कर्म माधवाय समर्पयेत् दीनांधबंधु
सहितो भुंजीत च प्रहर्षितः ॥ सप्तकालं प्रकुर्वीत पूर्णं यावदेव वाखिलं अशक्तो संस्मयप्नात्तनं हव
नेन विप्रभोजने ॥ तत्राप्यशक्तौ कृत्वा च वेणीमाधवपूजनं दंपतीभोजनं कृत्वा दद्याद्वायनमुत्तमं ॥
दरिद्रश्चासमर्थश्च नरो नार्यपि वाहृता श्रामदं पतिपर्याप्तं वायनं च निवेदयेत् ॥ ब्राह्मणाः क्षत्रिया
वैश्याः स्त्रियः शूद्रास्तथैव च प्रतिलोमानुलोमाश्च कुर्युरित्यफलेप्सवः ॥ प्रयागे वेदृष्टे देतदुद्या
पनमनुत्तमं तथान्यतः कोटिगुणं माधवः कुरुते स्वयं ॥ एवमुद्यापनविधिः शौनकाद्यामहर्षयः

कथितोभवताद्गीत्येकिमन्यच्छ्रोतुमिच्छथ ॥ इतिश्रीपद्मपुराणेप्रयागमाहात्म्येमाघोद्यापनविधि
निरूपणंनामएकपंचाशत्तमोध्यायः ॥५१॥ ॥पूर्वार्द्धःसमाप्तः॥ ॥श्रीवेणीमाधवाभ्यांनमः॥ ऋषयऊचुः
प्र॰मा॰ सूतसूतमहाबुद्धेपौराणिकशिखामणे भवतायत्पुराप्रोक्तंवेणीमाधवपूजनं ॥ तत्रनःसंशयोजातो
९९ विशेषाज्ञानजृंभितः सर्वलोकहितार्थायतंविदारयदारय ॥ पंचायतनपूजांवैयस्तुकर्तुंसमी
हते सयथापूजनंकुर्यात्तंविधिंवदविस्तरात् ॥ सूतउवाच ॥ सम्यक्पृष्टंमुनिश्रेष्ठाःपंचानामपिपूज
नं वदाम्यहंभवत्प्रीत्यैसापराधविवर्जितं ॥ ऋषयऊचुः ॥ अपराधास्तुकेप्रोक्ताःपूजनेयद्विवर्जनात्
सांगंभवतितान्नादौवदपश्चात्तुपूजनं ॥ सूतउवाच ॥ द्वात्रिंशदपराधास्तुपूजावैगुण्यकारकाः तान्व
दाम्यहंयथाशास्त्रंशृणुध्वमवधानतः ॥ अंगुष्ठमर्दनंदेवेह्यधःपुष्पसमर्पणं अंगुल्यग्रेजलक्षेपोमौनं
व्ययमनस्कता ॥ अप्रक्षालितपादस्यप्रवेशोदेवमंदिरे उरूकपलाशकैःकुसुमैःपूजनंतथा
॥ पूजनेचास्थिरेकालेभक्ष्याद्यादिनिवेदनं वातमूत्रादिसंरोधकृतानाचम्यपूजनं ॥ शिलापीठासने
पूजाधर्मलिंगाग्रपूजनं निरासनस्थपापूजानत्वाग्रावृत्यकंबले ॥ नारिकेलभाजनेपद्मधूपदीपनिवेद

नं भूत्वाहृष्योरनक्तंचभोजनंहरिवासरे ॥ स्पृत्वाईवाससापूजा ऽस्पृश्यस्पृष्टस्यपूजनं दक्षिणस्यस्य
यापूजाविनातीर्थग्रहंभुवि: ॥ अपट्टनीलवस्त्रेणवरयाचकपूजनं मंत्रतंत्रक्रियाहीनमजीर्णान्नेनपू
जनं ॥ स्पृष्टादीपमनाचम्यपूजनंवाक्येनयत् याचितैःसाधनैःपूजाचैकवस्त्रेणपूजनं ॥ उभयोर्व्या
प्ययापूजान्यापारांतरसंयुता एतैर्विरहितापूजासापूजाभगवत्प्रिया ॥ सहस्रनामपाठाच्चगीतापा
रायणादपि तुलसीपूजनाच्चस्यादपराधनिवारणं ॥ जलेग्नौहृदिसूर्येचस्थंडिलेप्रतिमासुच यथा
धिकारमेतेषुविद्याद्धरिपूजनं ॥ अग्नौतुकर्मिणांपूजाजलेसूर्येतुपंडितः स्थंडिलेप्रतिमायांचा
ज्ञानीज्ञानीहृदंबुजे ॥ हविषाग्नौजलेपुष्पैर्नमस्कृत्याचभास्करे स्थंडिलेप्रतिमायांचषोडशोपचार
कैः ॥ मानसैरुपचारैस्तुसततंसंशोधितेहृदि आगमोक्तैःपूजयेत्ज्ञानीभक्तिमांश्चविशेषतः ॥ अथवा
सर्वदापूज्योहरिःकामिमुमुक्षुभिः सालग्रामशिलाचक्रेवज्रकीटविनिर्मिते ॥ स्थानषट्काधिकंश्रे
ष्ठंवैकुंठादधिकंतथा सालग्रामशिलाचक्रंस्थानंभगवतःप्रियं ॥ अथवक्ष्यामिमुनयःशिलाचक्रपरी
क्षणं शिलावर्णपरीक्षाचपूज्यापूज्यत्वमेवच ॥ सुदर्शनस्त्वेकचक्रोलक्ष्मीदामोदरःस्मृतः त्रिचक्र

स्याच्युतो देवस्त्रिचक्रो वा त्रिविक्रमः ॥ लक्ष्मीनारायणो देवश्चतुश्चक्र उदाहृतः जनार्दनश्चक्रो वासुदेव
प्र.श्री. स्तु पंचभिः ॥ प्रद्युम्नः षड्भिश्चक्रैः संकर्षणः सप्तभिः स्मृतः पुरुषोत्तमोष्टचक्रः स्यान्नृसिंहो नवचक्रकः
१६० ॥ दशावतारो दशभिरनिरुद्धस्ततोधिकैः द्वादशात्मा द्वादशभिरतऊर्ध्वमनंतकः ॥ पूजनीया गृह
स्थेन वर्णेन भ्रमरोपमा पंकजं कूपलाकारा कुंभजरेखांकिता ॥ स्वर्णरेखाधरा सौम्या त्रिधा लघुत
रा वरा चक्रांकमिथुनोपेता पूजनीया शिला द्विजैः ॥ शौनकायाः शाखायो वक्ष्ये पंचायतनपूजनं यदाचर
णमात्रेण सर्वसिद्धिं लभेन्नरः ॥ ब्रह्मरूपं च सत्स्वरूपेण सगुणत्वमुपागतं नामक्रियादिभेदेन भक्तस्त्वा
नसिद्धये ॥ हरिर्हरो भास्करश्च देवी च गणनायकः पंचायतनमुख्यास्ते कर्तव्या स्थानभेदतः ॥ मध्ये वि
ष्णुं समास्थाप्य चतस्रो विदिशासु च संस्थाप्य पूजयेदन्यान् विधिं तस्य वदामि वः ॥ यदा तु मध्ये गोविंदमीशा
न्यां शंकरं यजेत् आग्नेय्यां गणनाथं च नैरृत्यां पार्वतीसुतं ॥ वायव्यां पर्विकं चैव पूजयेद्विष्णुवल्लभः
यदा तु शंकरं मध्ये ईशान्यां श्रीपतिं यजेत् ॥ आग्नेय्यां च तथा सूर्यं नैरृत्यां पार्वतीसुतं वायव्यां तु यदा
पूज्या भवानी भववल्लभा ॥ सहस्रांशुं यदा मध्ये ईशान्यां पार्वतीपतिं ...ग्नेय्यां गणनाथं च नैरृत्यां मधुसूदनं

तथा ॥ वायव्यां पूजयेद्देवीं सूर्यभक्तः समाहितः भवानी तु यदा मध्ये ईशान्यां माधवं यजेत् ॥ आग्ने
य्यां पार्वतीनाथं नैरृत्यां गणनायकं प्रद्योतनं तु वायव्यां देवीभक्तः प्रपूजयेत् ॥ हेरंबं तु यदा मध्ये ईशा
न्यामर्चयेद्धरिं आग्नेय्यां पंचवक्त्रं तु नैरृत्यां जगदंबिकां ॥ वायव्यां द्युमणिं लंबोदरभक्तः प्रपूजयेत् स
स्थानवर्जिताः सर्वे ते दुःखशोकभयप्रदाः ॥ दृष्ट्वा नार्चयेत् तथा सूर्यं हृदयं बुधः विष्वमेतु प्रयत्नार्च्य
सालग्रामद्वयं समं ॥ एवं ज्ञात्वा विधानेन पंचायतनपूजनं कुर्वीत भक्तिमान्विप्रस्तत्प्रकारः प्रदर्श्यते
॥ देशकालाद्यनुस्मृत्य फलमुद्दिश्य मानसं संकल्प्य कलशाद्यर्च्य न्यासं कुर्याद्यथाविधि ॥ करपात्
जानुकटिगुनाभिहृत्कंठबाहुषु मुखाक्षिमस्तके न्यासं वामादौ पादयोश्चरेत् ॥ त्वाभिषड्भिरुक्तिभिः
करादिन्यासमाचरेत् देवस्तु तेन वा कुर्यात् करादिन्यासमर्चकः ॥ एवं न्यासविधिं कृत्वा षोडशोपचा
रकैः पूजयेत्पूजकः पूजां मनस्तत्त्वानुगुणतामला ॥ आवाहनासने पाद्यमर्घ्यमाचमनं तथा स्नानं वस्त्रं
यज्ञोपवीतं चंदनं पुष्पधूपकं ॥ दीपोपहारं नमनं प्रदक्षिणविसर्जने एतान्मुक्त्वा तेन क्रमाद्दद्यान्मंत्र
वं ॥ सालग्रामे न वर्तेत आवाहनविसर्जने षोडशात्र स्यात्सिध्यर्थं तत्र पुष्पांजलिं क्षिपेत् ॥ एवं संपूज्य

तत्पूर्वं कुर्याद्ब्राह्मणभोजनं यथा तथा पूजितो पि भगवान्केशवो न तुष्यति ॥ ब्राह्मणस्तस्त्रियो नूनं ब्राह्मणेनां च स

प्र·मा· प्रियः न तयोरंतरं किंचित्तस्मैव द्रष्टव्यं ततो जनः ॥ यथा विष्णुमुखेनायमत्ति प्रीत्या मुनीश्वराः अग्न्यादिहविर्दा

१०१ नान्नत्था नात्ययमादरात् ॥ द्विजे तुष्टे खिलं तुष्टं जगत्स्थावरजंगमं तस्मिंश्च रुष्टे खिलं रुष्टमतः पूज्यतमो द्विजः

॥ यो दृष्ट्वा ब्राह्मणं मूढो प्रत्यहं भगवत्तनुं तमेव द्वेष्टि सोस्य वैतत्कृतं विफलं भवेत् ॥ विप्रपुत्रं स्वमानेषु श्री

पत्यपि विशेषतः न विक्रियेत यश्चांतं तेन विष्णुर्वशी कृतः ॥ महाभाजं प्रियं नैव वैकुंठं न तथा प्रियं प्रियाने

व तथा लक्ष्मीर्यथास्य ब्राह्मणः प्रियः ॥ तस्माद्विप्रोद्धितं पूज्यं गृहीत्वा चरणोदकं विष्णुपादोदकं पश्चाद्गृहीया

द्विधिकोविदः ॥ एवं यः पूजयेद्भक्त्या भगवंतमनन्यधीः षोडशोपचारैस्तत्फलं मे निबोधत ॥ आवाह

नादर्थसिद्धिरासनादुत्तमं गृहं पद्यात्संपूज्यते लोके नर्घ्याद्यो अभिजायते पुमान् ॥ सोमपानं लभेत विप्रः सत्य

मा चमनीयतः पंचामृतप्रदानेन गोकुलं दधिदुग्धयुक् ॥ शुद्धस्नानेन गंगायां नित्यस्नानं लभेनरः वस्त्रात्सु

वस्त्रतामेति ब्रह्मत्वमुपवीतकात् ॥ चंदनाद्गंधपुष्पेभ्यो लभते भोग्यसंपदं धूपादिंद्रपुरे वासस्तमोनाशः प्रदी १०१

पकात् ॥ नैवेद्यान्नभोज्यसंपत्तिस्तांबूलाद्दुःखनाशनं दक्षिणादानतः प्राप्तिरिंदिरायाः सुपुष्कला ॥ प्रद

१

क्षिणेत्वायासत्वं नमस्कृत्या नमस्कृतः स्तुत्या च स्तूयते लोके विसर्गादनिरोधता ॥ प्रत्येकमुपचाराणां षोडशाना

मिदं फलं सकलैः सकलप्राप्तिर्जायते सनकादयः ॥ विधिरेष मया प्रोक्तः पंचायतनपूजने अनेनाचरतां पुंसां मैहि

कामुष्मिकं फलं ॥ प्रयागे विधिनानेन माघमासे विशेषतः फलानंत्यं सुखादेवं कुर्वतां भवति ध्रुवं ॥ दरिद्राः

णामपि विधिः प्रोक्तो भक्तिमतामयं महादाना न्यदानादि रूपस्वधनिनां परः ॥ कार्या विधिनिमित्तस्माद्दानानि च

यथाविधि तैरेव माधवो देवस्तोष्यस्यखिलसर्वदः ॥ ३० ॥ इति श्रीपद्मपुराणे प्रयागमाहात्म्ये पूजाविधिनिरूपणं ना

म द्विपंचाशत्तमो ध्यायः ॥ ५२ ॥ ऋषय ऊचुः सोघापनं समाहात्म्यं माघस्नानं त्वयोदितं श्रुत्वा प्रमुदिताः सर्वे शृण्मो

त्यद्भुतं प्रभो १ शंसैः दानानि कार्याणि त्वयोक्तानि कृत्स्नानि भवता बहुधा तत्र वयं संदेहमागताः २ कानि दाना

नि देयानि केभ्यः कुत्र कदा कथं एतदाचक्ष्व नः सूत सर्वज्ञोसि महामते ॥ सूत उवाच ॥ वदामि मुनिशार्दूलाः शृ

णुध्वं सावधानतः नानादानविधिं भक्त्या प्रयागे गण्यपुण्यदं ॥ दत्वा त्वागतयः पात्रे स्वसत्ताव्यागपूर्वकः पर

स्वत्वस्य जनं यत्तोसत्वमित्युच्यते बुधैः ॥ सत्पात्रतुल्यभावादिदानेनाप्युदयावहः श्रद्धाभक्तीच दातानां वृद्धिदाय

करे स्मृते ॥ अदुष्टो रोगी धर्मात्मा दित्सुरव्यसनः शुचिः अनिंद्यजीवकर्मा च दाता नरः प्रशस्यते ॥ पात्रेभ्यो दीय

तेनित्यमनपेक्ष्य प्रयोजनं केवलं धर्मबुद्ध्या यद्धर्मदानं तदुच्यते ॥ प्रयोजनमपेक्ष्यैव प्रसंगाद्यत्प्रदीयते तदर्थ
प्र.शा. दानमित्याहुरैहिकं फलहेतुकं ॥ स्त्रीपानमृगयाक्षाणां प्रसंगाद्यत्प्रदीयते अनर्हेषु च रागेण कामदानं तदुच्यते
१०२ ॥ सभायां व्रीडयाश्रुत्वा चार्थिभिः प्रयाचितः प्रदीयते च यद्दानं व्रीडादानमिति स्मृतं ॥ दृष्ट्वा प्रियाणि श्रुत्वा
वा हर्षवद्यत्प्रदीयते हर्षदानमिति प्राहुर्दानं तद्धर्मचिंतकाः ॥ आक्रोशानर्थहिंसानां प्रतीकाराय यद्भवेत् दीय
ते त्वपकर्तृभ्यो भयदानं तदुच्यते ॥ त्रिशुक्लः शुक्लहृन्निग्रहणे सकलेंद्रियः विमुक्तो योनिदोषेभ्यो ब्राह्मणः
पात्रमुच्यते ॥ सत्वं शौचं दमो धैर्यं व्रतमित्यभिधीयते विद्या तपश्च तपश्चैतद्द्विपात्रं प्रचक्षते ॥ येन नास्ति
हिंस्रेभ्यो जाराय पतिताय च पिशुनभ्रूणहंतृभ्यां दत्तमल्पफलं भवेत् ॥ महदप्यफलं दानं श्रद्धया परिव
र्जितं श्रद्धयोपेतमल्पं च महाफलमुदाहृतं ॥ ध्रुवमाजस्रिकं काम्यं नैमित्तिकमिति क्रमात् पुनश्चतुर्वि
धं प्राहुर्दानं दानविदो बुधाः ॥ प्रपारामतडागादि सर्वकामफलं ध्रुवं तदाजस्रिकमित्याहुः क्रियते यद्दिने दि १०२
ने ॥ स्वर्गापत्यविजयैश्वर्यस्त्रीबालार्थं यदिष्यते इच्छाकृतं तु तद्दानं काम्यमित्यभिधीयते ॥ कालापेक्षं क्रिया
पेक्षमर्थापेक्षं च यत्कृतं त्रिधा नैमित्तिकं प्रोक्तं सहोमं होमवर्जितं ॥ उत्तमं मध्यमं चैवाधमं चेति त्रिधा पुनः

देयोत्तमत्वमध्यत्वाधमत्वैः परिकीर्तितं ॥ अन्नं दधि मधु त्राणं गोभूरुक्माश्वहस्तिनः एतेषामुत्तमं
दानमुत्तमद्रव्यदानतः ॥ विद्यावासोपभोग्यानि वस्त्राणि सौषधानि च मध्यमं दानमेतेषां मध्यमद्र
व्यदानतः ॥ बहुत्वादर्थजातानां संख्या शेषेषु नेष्यते अतोधमानि शेषाणि ह्यधमद्रव्यदानतः ॥
सत्वेन रजसा वापि तमसा यः प्रयच्छति दानं तथा सोभवति फलं भुंक्ते तथैव च ॥ देवत्वं सात्विकात्प्राप्य
राजसान्मनुष्यतां तिर्यक्त्वं तामसात्प्राप्य भुंक्ते त्रिगुणजं फलं ॥ प्रयत्नमतस्तु लब्धं ज्ञानी यात्सात्विकं
फलं राजसं कर्मणा लब्ध्वा तामसं तु कुकर्मणा ॥ श्रीणत्युरंति दानानि महादानानि षोडश बहून्यन्यानि
दानानि चैकपूर्तादिकानि च ॥ अतिदानानि चोक्तानि गावः पृथ्वी सरस्वती नरकादुद्धरंत्येते दोहवाप
जपादिभिः ॥ अग्निहोत्रं तपः सत्यं वेदानां चैव पालनं आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥ वापी
कूपतडागादि देवतायतनानि च अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥ इष्टदत्तं च जप्तं च विनश्य
त्यनुकीर्तनात् तस्माद्दानं कृतं पुण्यं यत्नेन परिकीर्तयेत् ॥ अंधबधिरमूकाव्याधिनोपहताश्च ये
भर्तव्यास्ते नरदानेन न दयाद्गुणादिकं ॥ दीनांधमूककृपणजडवामनपंगुषु अन्नवस्त्रजलादीनि

ददद्दानंत्यमश्नुते ३४ अन्नदानेनकर्तव्यं पात्रान्वेषणमण्वपि अन्येषुसर्वदानेषुकार्यंपात्रपरीक्षणं
प्र॰शा॰ ३५ तद्धनंदानयोग्यंयत्स्वशेषार्पितैःसमर्जितं धनमूलाःक्रियाःसर्वाःसफलाविफलास्त्वपि ३६ सत्यवित्ता
गमाधर्मादयोलाभःक्रयोजयः प्रयोगःकर्मयोगश्चसत्प्रतिग्रहएवच ३७ यद्यद्दिष्टतमंलोकेयच्चास्या
१०२ दपिस्वेगृहे तत्तद्गुणवतेदेयंतदेवाक्षयमिच्छता ३८ सकुटुंबाविरोधेनदेयंदारादिभिर्विना विरोधे
नापिदातव्यमन्नंयच्चप्रतिश्रुतं ३९ सर्वमेतद्विचार्यादौदानंदद्याद्यथाविधि तद्दानमक्षयंभूत्वादा
तुःसमुपतिष्ठति ४० इतिश्रीपद्मपुराणेप्रयागमाहात्म्येदानादिलक्षणनिरूपणंत्रिपंचाशत्तमोध्
यः॥ ५३ ॥ सूतउवाच॥ गोभूतिलहिरण्यादिदद्यान्नित्यमतंद्रितः आर्त्तेभ्योन्नप्रदानेनगोदानेनकुटुंबिने १
यस्योपयोगियद्द्रव्यंतद्देयंतस्यवैनिवेदयेत् उपयुक्तप्रदानेनफलंतात्कालिकंविदुः २ कृष्णाजिनेचैवकौ
पीनाच्छादनेतथा मेखलांकरकंभक्त्याप्रदद्याद्ब्रह्मचारिणे ३ वस्त्रंशय्यासनंधान्यमगारंसपरिच्छदं दत्तमेत
द्गृहस्थायभवेद्बहुफलान्वितं ४ नीवारोवल्कलंशाकंफलंमूलंचगोरसं वानप्रस्थायदत्तंसद्दानंतत्परिकी १०३
र्तितं ५ भैक्ष्यंजलंजलाधारंकंथांकौपीनमेवच कटिसूत्रंत्रिविष्टंचदद्यात्स्वसृष्टिलेपरं ६ गंधमांगल्यतांबूल

रक्तवस्त्रांजनादिकं सधवानामिदंदेयमधवावसनाशने ७ देवतानांगुरूणांचमातापित्रोस्तथैवच पु
ण्यंदेयंप्रयत्नेननापुण्यंतस्यकर्हिचित् ८ रविमोपुरुषोलोकेसूर्यमंडलभेदिनौ दुर्भिक्षेन्नस्यदाताचसु
भिक्षेहेमवस्त्रदः ९ उपहत्यपरस्वार्थंदानंयत्संप्रयच्छति सदातानरकंयातियस्यार्थस्तस्यतत्फलं १० वेद
विक्रयसंप्राप्तंस्त्रीभिर्यच्चार्जितंधनं अदेयंपितृदेवेभ्योयच्चक्लीबादुपागतं ११ बहुभ्योनप्रदेयानिगोगृहं
शयनंस्त्रियः विभक्तदक्षिणाह्यस्तादोषेणनविशेषतः १२ विवर्तांरोगिणींतुष्टांसविरांत्यगर्भीषणं दी
र्णांचीर्णशरीरांगांदत्वादोषमवाप्नुयात् १३ नवैरवर्यांनविरूपांमहींदद्यात्कथंचन नश्मशानपरीतांच
नचव्याघ्रादिसेवितांभुवं १४ दुःखंददातियोन्यस्यध्रुवंदुःखंसविंदति तस्मान्नकस्यचिद्दुःखंदातव्यंदुःखभी
रुणा १५ यतयेकांचनंदत्वाताम्बूलंब्रह्मचारिणे चौरेभ्यश्चाभयंदत्वादातापिनरकंव्रजेत् १६ सुतमन्नेन
गृहस्थस्यवानप्रस्थस्यगोरसः वृत्तिश्चभिक्षुहस्तिभ्योनदेयंपुण्यमिच्छता १७ भुवंधेनुमश्वंचरत्नानिकं
नकंतथा तिलांश्चकुंजरंदद्यान्नाविज्ञायगुणागुणान् १८ कुटुंबार्थेहिसंक्षुद्रास्त्रातिग्रासमयाचितं द्
त्वर्थमातानैवनहिंस्याचेनकर्हिचित् १९ नित्यमाचरितंप्राज्ञैःपंचयज्ञादयावता तावन्तमेवगृह्णीयात्स्व

तिग्रहमतं द्विजैः २० तुलापाकरणार्थं हि प्रतिग्राह्यं द्विजोत्तमैः विक्रीयं यान्त्यतस्य मातापित्रर्थमेव वा २१
प्र॰ पु॰ प्रतिष्ठार्थं च भृत्यार्थं गुर्वर्थं स्वार्थमेव वा शूद्रान्नं प्रतिगृह्णीयान्न तु भोज्यं स्वयं ततः २२ खलक्षेत्रगतं धान्यं
१०४ वापीकूपगतं जलं कु[illegible]दत्तमपि ग्राह्यं यच्च गोष्ठगतं पयः २३ ग्राह्यं प्राणप्रदानं च चंडालात्पुल्कसाद
पि जीवन्सर्वमवाप्नोति जीवन्धर्मं करोति च [illegible] शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः कथं भवेन्मुनिश्रे
ष्ठा धर्मो मोक्षश्च तद्विना [illegible] एकादश्यप्यमावास्या पूर्णिमा पुत्रजन्म च द्वादशी च व्यतीपातो ग्रहणं चंद्रसू
र्ययोः २७ मन्वादयो युगाद्याश्च संक्रांतिर्वैधृतिस्तथा अलभ्ययोगलाभश्च तीर्थप्राप्तिर्विशेषतः २८ इत्या
दिपुण्यकालाश्च दानयोग्याः प्रकीर्तिताः एषु दानानि देयानि विशेषफलहेतवे २९ रात्रौ दानं न कर्तव्यं क
दाचिदपि केनचित् निशीथे तु विशेषेण न शुभं कर्म शर्मणे [illegible] ग्रहणे सूर्यसंक्रांतौ विवाहात्ययवृद्धिषु
स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषु च ३१ दानं चोभयसंध्यासु तथा चातिथिपूजनं गोभूजां जाह्नवी
स्नानं कुर्यान्निश्यपि भक्तिमान् ३२ गंगाद्वारे प्रयागे च वाराणस्यां च पुष्करे कुरुक्षेत्रे गयायां च तीर्थे चामरकं १०४
टके ३३ नैमिषे वंतिकायां च विंध्यपादे च हृदके एवमादिषु देशेषु दत्तमक्षयतामियात् ३४ सर्वतीर्थम

यी गंगा यत्र प्राची सरस्वती अथवा यमुनातीरे दत्तं कोटिगुणं भवेत् ३५ अग्निहोत्रगृहे गोष्ठे शिवायाय
तने षु च अनंतफलदं दानं देवब्राह्मणसन्निधौ ३६ प्रयागे वटसामीप्ये वेणीमाधवसन्निधौ माघे दत्तं वि
शेषेण वटबीजमिवैधते ३७ अतएवात्र देवाद्यास्तव पदस्तुतिभीरवः विघ्नयंति वदानादिदुर्लभं द्विजस
पतः [illegible] माधवस्य कृपा हि स्यात्स्यो पतिर्भवेत् ह [illegible] तस्यैव घटते दानं नान्यथा स्वराशिभिः ३९ अतोत्रैवे
प्रकुर्वंति दानादिकमतं द्विजाः विज्ञेयानि यतं तैवैव वेणीमाधववल्लभा [illegible] ॥ इति श्रीपद्मपुराणे प्रयागम
हात्म्ये दानद्रव्यादिनिरूपणं नाम चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ सूत उवाच ॥ सम्यक्साधनं कर्म कर्तव्य
मधिकारिणा निष्कामेन यथा सांगं काम्यं कामाभिलाषिणा [illegible]स्यक कर्मविधिं ज्ञात्वा करोत्यविधिना
तु यः फलं न किंचिदाप्नोति क्लेशमात्रं हि तस्य तत् [illegible]भुः प्रथमकल्पो यो नुकल्पे प्रवर्तते न पारलौकि
कं तस्य फलं भवति निश्चितं [illegible] दयालावत् या किंचित्स्वल्पं वा बहु वा धनं अव्रतया त्यद्दत्तं दातुस्तद्दोष
मावहेत् [illegible]श्रुणु साधयो गुप्तदानी गुप्तपूजा जापि साक्रियः पूज्यते सर्वलोकेषु सर्वदेवैः शतक्रतुः [illegible] दानं ज्ञा
नं तपस्या योगं अन्यकर्मविधिक्रियाः मंगलाचार नियमाश्च शौच स्यानिष्फलाः [illegible] स्नातो धिकारी भवति १

दैवे पित्र्ये च कर्मणि स्वाध्याये मंत्रजाप्ये च दाने च विधिचोदिते ॥ ददामीदमिति ब्रूयात्सकुशोदकरस्ततः तोयं द्विजक
२१ रे दद्याद्दाने विधिरयं स्मृतः ॥ यज्ञोपवीती तावद्धि वेशिरश्चा कृतनित्यक्रियः कुर्यात्काम्यं नैमित्तिकं पुनः
॥ नामगोत्रे समुच्चार्य संप्रदानस्य चात्मनः संप्रदेयं प्रदातव्यं कन्यादाने तु पुंत्रयी ॥ प्रणवपूर्वं तु योद्दद्याद्ब्राह्मणाय प्रति
ग्रहं स पूर्वं नरकं याति ब्राह्मणस्तदनंतरं ॥ सहवासेन तत्कुलं शुचित्वं व्यवहारतः प्रज्ञान्वयाक्तो ज्ञेयास्त्रिभिर्विप्रं प
रीक्षयेत ॥ दद्यात्पूर्वामुखो दानं गृह्णीयादुत्तरामुखः पुण्यवृद्धिर्द्वयोरेवं विवाहे तु विपर्ययः ॥ ॐकारमुच्चरन्दाता
द्रविणं सकुशोदकं गृहीयाद्दक्षिणे हस्ते तद्दं ते स्वस्ति कीर्तयेत ॥ सावित्रीं पूर्वमुच्चार्य द्रव्यं द्रव्याधिदेवतां कामस्तुतिं पठे
त्स्वस्ति प्रतिग्रहविधिस्त्वयं ॥ मासं पक्षं तिथिं वारं नक्षत्रं योगमेव च अनुक्त्वैव तस्य दानस्य न पूर्णं फलमाप्नुयात ॥ अ
द्भिपूतं स्वविदीतोदानं दद्यात्सदक्षिणं अदक्षिणं भवेद्दानं भस्मनीव हुतं हविः ॥ यथाशक्तिवित्तं दानेषु प्रदेयादक्षिणा
वरा यथाश्रोत्रात्सौवर्णी दानस्याहुरणकादिषी ॥ सर्वेषामपि दानानां सुवर्णं दक्षिणोच्यते सुवर्णोदीयमाने तु रज
तं दक्षिणोच्यते ॥ देयं द्रव्यतृतीयांशं दक्षिणां परिकल्पयेत अनुक्तदक्षिणादाने दशांशं वापि भक्तितः ॥ दशमांशस्तु ॥
वर्णस्य ग्राह्यः सर्वत्र दक्षिणा यथाशक्त्या यवादेयमपि मूलफलादिकं ॥ पंचसौवर्णिका निष्का महादानेषु दक्षिणा अ

शक्तौ तदर्धांशो च यौ व्यासेन परिकीर्तिताः ॥ असंनिधाने पात्रस्य समये समुपागते पात्रमब्भिः संधाप्य तोयं तोये
विनिक्षिपेत ॥ उभयासंनिधाने च द्रव्यमादित्यदैवतं ध्यात्वा च ब्राह्मणं पात्रं तज्जलमध्ये जले क्षिपेत ॥ परोक्षे कृत
दानस्य फलं दोषविवर्जितं दृश्यते सागरस्यांतोनंतदानस्य दृश्यते ॥ एवं विचार्य सत्पात्रे दानमाचरेत यथा
विधि यथाशक्ति तेन प्रीणाति माधवः ॥ इति प्रतिग्रहः ॥ भवतीतः श्रुतोस्माभिर्दानानां विस्तृतो विधिः इदानीं मानसं
जातं त्वत्तः कीर्तिपुण्यपावनं ॥ इदानीं श्रोतुमिच्छामो महादानानुकीर्तनं कति वा वदतः सेव्य महादानानि कानि वा
॥ श्रूयतां मुनयः सर्वं महादानानुकीर्तनं यथोक्तं दानधर्मेषु विष्णुना प्रभविष्णुना ॥ सर्वपाप
क्षयकरं नृणां दुःस्वप्ननाशनं यत्तु षोडशधा प्रोक्तं वासुदेवेन भूतले ॥ पुण्यं पवित्रमायुष्यं सर्वपापहरं शुभं पूजितं स
कलैर्देवैर्ब्रह्मविष्णुशिवादिभिः ॥ आद्यंतु सर्वदानानां तुलापुरुषसंज्ञितं हिरण्यगर्भदानं च ब्रह्मांडं तदनंतरं ॥
कल्पपादपदानं च गोसहस्रं च पंचमं हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च ॥ हिरण्याश्वरथस्तद्वद्धेमहस्तिर
थस्तथा पंचलांगलकं तद्वद्धरादानं तथैव च ॥ द्वादशं विश्वचक्रं च ततः कल्पलतात्मकं सप्तसागरदानं च र
त्नधेनुस्तथैव च ॥ महाभूतघटस्तद्वदिति मः परिकीर्तिताः सर्वाण्येतानि कृतवान्पुरा च मधुसूदनः ॥ वासु

देवश्च भगवानंबरीषश्च पार्थिवः कार्तवीर्यार्जुनश्चैव प्रह्लादः पृथुरेव च ॥ चक्रुरन्ये महीपालाः केचिच्च भरता
प्र॰ शा॰ दयः श्रीमत्तात्रिप्रदेयानि संसारभयभीरवः ॥ अनित्यं जीवितं यस्मात् लक्ष्मीरप्यतिचंचला गृहीत इव केशेषु मृ
१०६ त्युना धर्ममाचरेत् ॥ [illegible] नामधिकारो ऽस्ति दानेष्वेतेषु सर्वथा तैरतो ऽत्र प्रदेयानि महादानानि सुव्रताः ॥ स
र्वेषामुपकारार्थं गोदानं तु विशिष्यते करोति यः प्रयागे तत्सर्वदानसमं स्मृतं ॥ इति श्रीपद्मपुराणे प्रयागमा
हात्म्ये महादानानुकीर्तनं नाम पंचपंचाशत्तमो ऽध्यायः ॥ ५५ ॥ ऋषय ऊचुः ॥ सर्वदानाधिकं सूत सर्वेषामुपकार
कं गोदानं भवता प्रोक्तं विस्तरात्तद्विधिं वद ॥ सूत उवाच ॥ श्रोतारः सावधानेन गोदानस्य विधिं शुभं शृण्वंतु
श्रवणाद्यस्य प्राप्यते पुण्यमुत्तमं ॥ विमानवरमारूढो दिव्याभरणभूषितः येगां तु वा कुलि[illegible]वर्गं स गोदानं प्रयच्छतु
[illegible]त्रिविधाघविनिर्मुक्तिं वैकुंठवसतिं ॥ समस्तपितृमुक्तिं च कामयानो ददात्यगां ॥ शुचिः संभृतसंभारः पुण्ये
काले शुभस्थले सपत्नीकः समाचम्य प्राणानायम्य वाग्यतः ॥ देशकालावनुस्मृत्य सर्वपापनुत्तये इष्टकाम
प्रसिध्यर्थं माधवप्रीतये पवा ६ गोप्रदानं करिष्ये ऽहमिति संकल्प्य भक्तिमान् गणेशं पूजयित्वाथ वृणुयात्पात्र १०६
मुत्तमं ७ सपत्नीकः शुचिः शांतः सद्वृत्तः श्रोत्रियो द्विजः अव्यंगश्चाप्यरोगी च कुटुंबी पात्रमुच्यते ८ पूजयित्वा

तं

पत्नीं संपूज्य कवस्त्रालंकारसाधनैः गवामंगेषु सर्वेषु देवतान्यासमाचरेत् ॥ ब्रह्मा विष्णुः स्थितौ नित्यं गवां वै शृंग
मूलयोः शृंगाग्रे सर्वतीर्थानि स्थावराणि चराणि च ॥ शिरोमध्ये महादेवः सर्वभूतमयः स्थितः ललाटाग्रे
स्थिता गौरी नासावंशे च षण्मुखः ॥ कंबलाश्वतरौ नागौ नासापुटमुपाश्रितौ कर्णयोरश्विनौ देवौ नेत्रयोः शशिभा
स्करौ ॥ दंतेषु वायवः सर्वे जिह्वायां वरुणः स्थितः सरस्वती च हुंकारे मासपक्षौ च गंडयोः ॥ ओष्ठद्वये च संध्ये द्वे
ग्रीवायामिंद्र आस्थितः वक्षःस्थले च रक्षांसि साध्याश्चोरसि संस्थिता ॥ चतुष्पात्सकलो धर्मः स्वयं जंघासु सं
स्थितः खुरमध्येषु गंधर्वाः खुराग्रेषु च पन्नगाः ॥ खुराणां पश्चिमाग्रेषु गणा ह्यप्सरसां तथा रुद्राश्च सकलाः पृष्ठे
वसवः सर्वसंधिषु ॥ श्रोणीतटस्थाः पितरः सोमो लांगूलमास्थितः आदित्यरश्मयो वालाः पिंडीभूताश्च संस्थिताः
॥ साक्षाद्गंगा च गोमूत्रे गोमये यमुना स्थिता क्षीरे सरस्वती देवी नर्मदा दध्नि संस्थिता ॥ हुताशनः स्वयं सर्पिः श्री
स्थानानां गुरुः परः अष्टाविंशतिदेवानां कोट्यो रोमसु संस्थिताः ॥ उदरे पृथिवी ज्ञेया सागराश्च पयोधराः एवमा
वाह्य सर्वांगे देवताः सम्भिरन्विता २० पूजयेद्गां ततो भक्त्या षोडशोपचारकैः वस्त्रालंकारमालाभिर्गां च इति
मंत्रतः २१ सहिरण्यं नवं वासः कार्पासं कौशमेव वा आच्छादनं मया दत्तं सुरभे प्रतिगृह्यतां २२ सुरभे त्वं जगन्माता

दविविष्णुपदेस्थिता आसंगृह्णाणमद्दत्तं गोमातस्त्वातुमर्हसि गावामंगेषु तिष्ठंति भुवनानि चतुर्दश यस्मात्तस्मा
च्छिवं मेस्यादिहलोके परत्र च २५ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः गावो मे पार्श्वयोः संतु गवां मध्ये वसाम्यहं २६
ब्र·प्रा· एवं प्रदक्षिणीकृत्य त्रिवारं भक्तिमान्नरः मंत्रेणानेन सस्त्रीकः साष्टांगं प्रणमेत्ततः २७ पंचगावः समुत्पन्ना मथ्यमाने म
१० होदधौ तासां मध्ये तु या नंदा तस्यै धेन्वै नमो नमः २८ एवं प्रणम्य गोपुच्छं गृहीत्वा दक्षिणे करे दक्षिणाभिमुखः पितॄं
स्तर्पयेत्तु तिलैर्जलैः २९ एवं संतर्प्य पित्रादीन्पूर्ववत्तान्तदनंतरं ब्रह्माद्या देवताः सर्वास्तर्पयेद्भक्तिमान्नरः ३० ब्रह्माद्या
देवताः सर्वा ऋषयो मानवास्तथा असुराः पन्नगा नागा मातरश्चंडिकास्तथा ३१ दिक्पाला लोकपालाश्च ग्रहदेवा
धिदेवताः सर्वे ते तृप्तिमायांतु गोपुच्छोदकतर्पिताः ३२ विश्वेदेवास्तथादित्याः साध्याश्चैव मरुद्गणाः क्षेत्रपीठोप
पीठानि नद्यो नद्यश्च सागराः ३३ पाताले नागपत्न्यश्च नागाश्च कुलपर्वताः पिशाचा गुह्यकाः प्रेता गंधर्वगणराक्षसाः
३४ पृथिव्यापश्च तेजश्च वायुराकाश एव च भुवि दिव्यंतरिक्षे च पाताले तलवासिनः ३५ तपोधनश्च भगवानव्ययः पर
मेश्वरः क्षेत्रौषधिलता वृक्षा वनस्पत्यधिदेवताः ३६ कपिलः शेषनागश्च तक्षकोनंत एव च अन्ये जलचरा जीवाश्च १०७
संख्यातीता अनेकशः ३७ चतुर्दश यमाश्चैव ये चान्ये यमकिंकराः यक्षाः सिद्धाः किन्नराश्च ... पशवस्तथा अजा

गावो महिष्यश्च ये चान्ये सर्वतः स्थिताः शांतिदाः शुभदाः संतु गोपुच्छोदकतर्पिताः ३८ सर्पव्याघ्रहता ये च शृंगिदंष्ट्रि
नखादिभिः अपुत्रा ह्यक्रिया ये च प्रदाराधर्मवर्जिताः ३९ आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः तृप्यंतु पितरः सर्वे
मातृमातामहादयः अतीतकुलकोटीनां सप्तद्वीपनिवासिनां आब्रह्मभुवनाल्लोका इदमस्तु पुच्छोदकं त्विदं ४० एवं का
मोदकं दत्वा ... सुरभीं ... जायमं ४१ स्वर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं पयस्वि
नीं चैलकंठीं कांस्यदोहां मुक्तालांगूलभूषितां ४२ सवत्सां तत्र ... रोद्गीघंटाचामरशोभितां दद्यात्तां कल्पसज्जलां पू
जितां पूजिताय गां ४३ घृतकुंभं तिलैः पूर्णं सस्वर्णं कांस्यभाजने निक्षिप्य सकुशं पुष्पं दद्याद्विप्रकरे कृती ४४ तते
दानस्य संपूर्त्यै ब्राह्मणाय स्वर्णदक्षिणां दत्वा विप्राय गोसूक्तं पठित्वा गोमतीं जपेत् ४५ गावो मामुपतिष्ठंतु हेमशृंग्यः
पयोमुचः सुरभ्यः सौरभेय्यश्च सर्वकामदुघाः शुभाः ४६ गावे पथ्यामाहुर्नित्यं गावः पवित्रं तु मां सदा गावो स्वर्गस्य सो
पानं तासां यतो गावस्ततो वयं ४७ गावः सुरभयो नित्यं गावो गुग्गुलसन्निभाः गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं
महत् ४८ अन्नमेव परं गावो देवानां हविरुत्तमं पावनं सर्वभूतानां रक्षंति च वहंति च ४९ हविषा मंत्रपूतेन तर्पयंत्यम
रान्दिवि ऋषीणामग्निहोत्रेषु गावो होमे प्रतिष्ठिताः ५० सर्वेषामेव भूतानां गावः शरणमुत्तमं गावः पवित्रं परमं गावो

मंगलमुत्तमं ॥ गावः सर्वस्य लोकस्य गावो धन्याः सवत्सकाः नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥ नमो
प्र.श. ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतं ॥ एकत्र मंत्रास्तिष्ठंति हविरन्यत्र
१०८ तिष्ठति घृतक्षीरदुघा गावो घृतयोन्यो घृतोद्भवाः ॥ घृतनद्यो घृतावर्त्तास्ता मे संतु सदा गृहे तत्र भूयसीं दत्वा
न्यूनाधिक्यनिवारिणीं ॥ कर्मेश्वरार्पणं कृत्वा शक्त्या संभोजयेद्द्विजान् अथवा देवतागारे गंगातीरे विचक्षणः
॥ पात्रं मनसि संधाय तोये तोयं विनिक्षिपेत् ततः पात्रमादाय गत्वा तां धेनुं सपरिच्छदां ॥ प्रदद्यात्तत्परायो ब्राह्मण भक्त्या ५
य सदक्षिणां अथवा पुण्यसमये गोमूल्यं दक्षिणायुतं ॥ देयं संकल्प्य विप्राय गोदानं चाक्षयं स्मृतं एवं कुर्वंति ये
भक्त्या येन केनापि वर्त्मना ॥ भुक्त्वैहिकं फलं सम्यग्लभते पारलौकिकं सलोमसमसंख्याब्दं दत्वा वैकुंठवासितां
॥ पितॄंश्चोद्धरेत्सद्यो दश पूर्वान्दशापरान् प्रयागे चेत्तटे तीर्थे माघमासे विशेषतः ॥ गोप्रदानं यथावित्तम
नेत फलदं भवेत् एवं वो मुनयः प्रोक्तो गोदानस्य विधिः फलं ॥ पठनाच्छ्रवणाद्वास्य दानस्य फलमाप्नुयात् अ
न्यान्यपि च दानानि वक्ष्याम्यथ निबोधत ५४ ॥ इति श्रीपद्मपुराणे प्रयागमाहात्म्ये गोदानविधिनिरूपणं नाम १०८
षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ सूत उवाच ॥ प्रयागे माघमासे तु दद्यादुभयतोमुखीं तेन दत्ता धरा कृत्स्ना सशै

लवनकानना ॥ प्रयागे वाजिदानेन पुरुहूतपदं व्रजेत् वृषदानेन कैलासं गजेन ब्रह्मणः पदं ॥ शय्यया स्वः
सुखावाप्ती राजं शिबिकया भवेत् गृहदानेन वैकुंठं रथेनेन परं व्रजेत् ॥ किं बहूक्तेन भूलोके यद्यदिष्ट
मं भवेत् प्रदद्याद्द्विपिवत्तात्प्रयागे तपसि द्विजाः ॥ एकत्रान्नप्रदानं स्यात्सर्वदानानि चैकतः नान्नदानस
दानि स्युस्तानीति ब्राह्मणाः श्रुतं ॥ अन्नमूलाः क्रियाः सर्वा अन्नमूलं च जीवनं तेनान्नदानमधिकं प्राणदानस
मं यतः ॥ ६ वरिष्ठं सर्वदानेषु सर्वधर्मेषु यन्महत् यत्कृत्वा सर्वधर्माणां फलमाप्नोति मानवः ॥ तदेतत्परिकर्त्त
व्यमन्नदानं विधानतः सर्वदुःखप्रशमनमायुः पुत्रविवर्धनं ८ ॥ ऋषय ऊचुः ॥ विधिना केन कर्तव्यं किमुद्दिश्य च
किं फलं एतद्विस्तरतोऽस्माकं वद लोकोपकारक ॥ सूत उवाच ॥ शृण्वंतु ऋषयः सर्वे एकाग्रहृतमानसाः अन्न
दानविधिं सम्यक् सर्वधर्मोत्तमोत्तमं ॥ उदगाते सहस्रांशौ पुण्यमासे मले दले सत्तिथौ शुभवारे च सुनक्षत्रे सुयो
गके ॥ पूर्वाह्णे तु सपत्नीको विहिताभ्यंगमज्जनः कृतनित्यक्रियः शांतः शुचिः संयमितेंद्रियः ॥ वेदवेदांगपार
ज्ञान्द्विजानाहूय कर्मठान् उद्दिश्य फलमुक्तिं वा भगवत्प्रीतिमेव वा ॥ भोजयिष्ये स्वशक्त्याहं सहस्रं ब्राह्मणान्
निति संकल्प्य पूजयेद्विघ्नेशं ब्राह्मणैः स्वस्ति वाचयेत् १४ कृत्वाभ्युदयिकं येन मां माचार्यं वृणुयात्ततः ब्राह्मणं च सदस्यं च

ऋत्विजो द्वादशाथवा ॥ सौवर्णं कलशं स्थाप्य सर्वलक्षणसंयुतं जनार्दनस्य प्रतिमां सौवर्णीं तत्र सादयेत् ॥१५ पूजयेत्त
प्र.श. र्याभक्त्या षोडशैरुपचारकैः संपूज्य प्रार्थयित्वा तं ब्राह्मणान्भोजयेत्ततः ॥ अयुतं दशांतसंख्याकान्न्यूनाधिकसंख्
१०९ या पायसं धात्रीतैः पुष्पैर्धूपदीपैः समर्चितान् ॥१७ पूर्णौ सहस्रसंख्यायां द्विजानां तद्दिने पुनः स्वगृह्योक्तेन मार्गेण त्रेता
याग्निं च स्थापयेत् ॥१८ वैष्णवेन तु मंत्रेण सहस्रं जुहुयाद्घृतं ततो द्वादशभिर्मंत्रैः केशवाद्यैश्च नामभिः ॥१९ ततो नाम्नां स
हस्रेण पूजयेद्देवस्य सर्पिषा हुत्वा विष्णुं तं हुत्वा होमशेषं समापयेत् ॥ आचार्येण विलेकर्मकारणीयमथापि वा ततस्सम
हस्रं यं कुर्याद्विलिख्य नादिकं ॥ उत्तरं पूजनं कुर्याद्दत्वाद्धौ दत्तं पुनः आचार्यं च सदस्यं च ब्राह्मणांश्चैव पूजयेत् ॥२१
आचार्याय ततो दद्यात्कपिलधेनुं सवत्सकां ब्राह्मणेभ्यः पयोगं सदस्याय प्रमेव च ॥ एकस्मैत्यादि मंत्राणं श्रावका
ऋत्विजश्चैव विप्रभोजनकाले तान् दक्षिणाभिश्च तोषयेत् ॥२३ स्मा: सर्वे यदात्मीयं तिष्ठति ब्रह्मरूपकं तदन्नदानतो
मस्त्रसंहृद्धात्तमाधवः ॥२४ अन्नदानेन देवेश प्रीतेन च जनार्दन प्रसन्नो भव मे कांतरमारमणसुंदर ॥ सिक्थं
सिक्थार्धमात्रं वा यद्दत्तमतिपावनं पक्वान्नं च रसैः पूर्णं शर्कराज्यसमन्वितं ॥ आज्यं मरीचैलागुडादिमधुरी
कृतं तांबूलदक्षिणायुक्तं श्रद्धाभक्तिसमन्वितं ॥२९ समर्पितं मयात्यंतमाकल्पफलदो भव यन्न्यूनमधिकं जातं तत्सं १९

गं कुरु मे प्रभो ॥ एवं विसृज्य तं देवं दक्षिणासकलायुतं दत्वाचार्याय परया भक्त्या तं प्रार्थयेत्ततः ॥३१ भगवन्सर्वध
र्मज्ञ प्रसादेन तवानघ त्वत्प्रसादादिदं कर्म संपूर्णं भवतु मे गुरो ॥३२ तर्पयित्वा द्विजान् शेषान् दीनांधकृपणादिकान् कर्मेश्वरा
र्पणं कृत्वा स्वयं भुंजीत बंधुभिः ॥३३ सहस्रभोजनविधिमेवं यः कुरुते नरः तस्य पुण्यफलं वक्तुं देवदेवोपि न प्रभुः ॥३४ नि
यमोन्नदाने क्षिपात्रे हस्तपितृमीरितं तथाप्यतिफलं प्रोक्तं वैदिकैर्द्विजभोजने ॥३५ वेदाभ्यासेन यस्यान्नं जीर्यते सुदरं ॥
गतं स्याधुर्वीन्द्रशापरान्संपितृन्नुद्धरेत्सकान् ॥ सहस्रब्राह्मणं भुक्त्वा मध्यमः स्वल्पभुंजीत याः येन केन प्रकारेण कु
र्वन्नाप्नोति वै फलं ॥३७ अनेनैव प्रकारेण लक्षं वा कोटिमेव वा स्वशक्त्या भोजयेद्विप्रान्शक्तो शतमेव वा ॥ तावद्दो
मं प्रकुर्वीत यावद्ब्राह्मणभोजनं होमं दशांशतो वा स्याद्वै तत्पूर्वकं वदाचरेत् ॥३९ दानानि सर्वशास्त्रेषु यान्युक्तानि व्रता
नि च तानि सर्वाणि पुनयोऽन्नदानसमानि न ॥ अन्नमूलं जगत्सर्वं प्राणाः ह्यन्नमयाः स्मृताः तदन्नममृतं भूत्वा ब्रह्म
भूयाय कल्पते ॥ धातवः सप्त सर्वे वा मन्नमूलाश्च देहिनां तस्मादन्नं प्रदातव्यं जगतामुपकारकं ॥ इंद्राद्यो ये दिवि देवाः
सर्वे तेन्नमुपासते अन्नं ब्रह्मेति वेदास्तु यस्य कं वेदिवर्णनं ॥ यस्य प्रदानतः सर्वे हृष्यंति सिद्धकिन्नराः ऐहिकामुष्मि
कान्भोगान् प्युक्तान्विज्ञपदेश्मिताः ॥ अनेन विधिना यो न प्रदानं कुरुते नरः पक्षकृतापि तेनासौ कल्पांतं लभते फलं ॥४

प्रयागेयदितत्कुर्याद्यथाविधियथावसु अन्यतःसमवाप्नोतिसनंतगुणितंफलं ४६ एवमुक्तोमुनिश्रेष्ठाःप्रयागेतीर
प्र॰मा॰ र्थनायके अन्नदानविधिःसम्यक्श्रुणुतान्यद्वदाम्यहं ४७ ॥इतिश्रीपद्मपुराणेप्रयागमाहात्म्येअन्नदानविधि
११० निरूपणेनामसप्तपंचाशत्तमोध्यायः॥५७॥सूतउवाच॥ यानिकानिचदानानिस्वल्पान्यल्पतराणिच तीर्थराजंस
मासाद्यमहत्वंयांतिभक्तितः १ अन्नकाश्यंतुतत्रापिमहत्तरमुदाहृतं विष्णुप्रियतरंश्रेष्ठंसर्वविघ्नैरबाधितं २ मंत्रतं
त्रक्रियाहीनमल्पकंविधिवर्जितं अन्नकाशंकृतंदानंप्रकाशाद्द्दशाधिकं ३ प्रयागेतिप्रशंसंतिगुप्तदानंमहर्षयः
अतोधनवताकार्यंदरिद्रेणापिशक्तितः ४ सस्वशक्त्याकृतंयद्यत्स्वल्पमप्यधिकं सर्वसाक्षीजगन्नाथोमाधवस्ते
नतुष्यति ५ अत्रचोदाहरंतीममितिहासंपुरातनं यस्यश्रवणमात्रेणगुप्तदानफलंलभेत ६ मध्यदेशेपुराकश्चिदा
सीद्वैश्योधनेश्वरः नाम्नागुप्तधनोलोभीकर्मण्यापितथैवसः ७ अयंतत्कृपणोऽदाताऽभोक्ताऽभोजयितापिच रंक
वृत्तिप्रियोदुःखंसुखवन्मन्यतेतमी ८ पतिव्रतातस्यभार्यासुनंदानंदरूपिणी सुशीलारूपसंपन्नावस्त्रालंकार
भूषिता ९ गृहकर्मणिदक्षासीद्देवद्विजपरायणा भुंजानास्वकृतंपुण्यंपत्युश्छंदानुवर्तिनी १० प्रातरादिनिशीथा ११०
तंनानाभोगान्भुनक्तिसा निशीथादुदयंयावत्क्व—वतिष्ठतिसर्वदा कदाचिद्गृहेकश्चिद्याचकःसमुपागतः भा

र्ययापाप्रेरितोदीनोद्रव्यार्जनपरोभ्रमन् ११ द्वार्यलिंदेसमासीनंदृष्ट्वाकुत्सितेंद्रियं ददर्शाथसुनंदातंब्राह्मणंक्षाम
सवर्णिणं १२ दृष्ट्वातथाविधंविप्रंकृपयानिर्भरमानसा अप्ययावनताभूत्वातमुवाचधनेश्वरी ॥सुनंदोवाच॥
कुतःसमागतंब्रह्मन्कुत्रेदानींचगच्छसि विह्वलोदृश्यतेकस्मात्किंवाक्षीणमनोगतं १३ ॥ब्राह्मणउवाच॥ दरिद्र
कुलचित्तोहंनोक्तहेवक्तुमण्वपि मनःसाधश्यंसमासाद्यवरिष्यामिस्वचेष्टितं १४ इतितद्वचनंश्रुत्वाज्ञात्वाचातिबुभु
क्षितं स्मरंत्यातिथ्यधर्मंसातंनिनायगृहांतरं १५ स्नापयित्वोष्णसलिलैःपरिधाप्यांबरंशुभं समावेश्यासनेरम्येऽपू
जयत्तंयथाविधि १६ अन्नंनानाविधंदत्वादधिक्षीरघृतादिच कारयित्वानुनार्याकंभोजयामासतंद्विजं १७ ततोप्यवसु
रंवस्त्रंभुक्तवत्यमलाशया नानापरिजनैर्युक्तातत्क्षणंबभुजेस्वयं १८ भुक्तवत्सुतःसर्वसीनकथासमाकुलाविताः सोदंतंक
थयामाससुनंदायतिहर्षितः १९ ॥द्विजउवाच॥ धर्मिष्ठेश्रुणुमेवृत्तंयत्कुमलिद्द्यागतः क्षियाविवसितोत्यर्थंदारि
द्र्यप्राप्तदुःखया २० धनमेवपरंलोकेसंसारसुखसाधनं तद्विनामृतकप्रायंव्यर्थंभवतिजीवितं २१ धनापाये
लंबोर्यसदाचारस्तथाक्रियाः कुलवर्णाश्रमाःसर्वेविफलाधनवर्जिताः २२ तदर्जनोत्सुकोहंवैदेवात्त्वद्गृहमागतः
त्वत्कृतंचसमास्तोभ्यग्रहदोपमिशुचिमिते २३ त्वंतमेसुभगाभासिचैवत्वाद्दृश्यसेकथं गृहस्वामीकुत्रचाद्योतेप्रोषि

नोवाक्षिवागृहे २१ ॥सुनंदोवाच॥ अद्यात्रैववस त्वं सत्यं यदि तं द्रष्टुमिच्छसि आगंता मध्यरात्रेऽसौ तदा तं पश्य सा
प्र·श· दरं २२ इत्युक्त्वा तं सुनंदा सा गृहकर्म चकार ह सच सुष्वाप पर्यंके आप्तानुतिकाम्यया २३ अथ सायं सुनंदा सा दी
१११ पान्प्रज्वाल्य सर्वतः कृत्वा सायंतनं कृत्यं सुष्वाप गृहमध्यगा २४ द्विजोप्युत्थाय सहसा धौतांघ्रियुगलस्ततः सं
ध्यामुपास्य मनसा जजाप ब्रह्म सत्वरः २५ अथ शून्यं गृहं दृष्ट्वा सुप्तां च गृहधर्मिणीं ददर्श सर्वतो गेहं सम्यग्दीपप्र
ज्वलितं २६ एकस्मिन्गृहभागे सौ द्रव्यभांडं महत्तरं दृष्ट्वा दातुं मनश्चक्रे निर्धनो धनलोभितः २७ तावत्तं च फणेनागस्तत उ
त्थाय तं द्विजं कृत्कारैर्भीषयन्नाह सक्रोधं हुंकनल्लालसं २८ ॥नाग उवाच॥ गृहाण्यासीदं धनं कस्य मामनादृत्य दुर्मते न
गृहस्वामिनो द्रव्यं न त्वया हि मया दिव २९ विष्णुशर्मातिधर्मात्मा किंचिद्दानपरः शुचिः निस्पृहः सर्वकामेषु अत्र यो
वसति द्विजः ३० त्वत्पद्मसाधवरे त्वत्र्यामे धाड्जनवृतः यायावरं समानीय किंचिद्दत्वा ततः स्वयं ३१ भुनक्ति पंचमे
काले शेते संध्यामठे सुखे तस्यैवं वर्तते द्रव्यं गुप्तदानप्रभावजं ३२ तत्त्वमिच्छसि चेत्कृत्वा गृहीष्यति दत्त्वया एवं निवा
रितो विप्रः स्वस्थाने समुना सह ३३ न निद्रौ धनमाशां संप्राप्तीद्रान्यत्र चोदयं कदाऽत्र आगमिष्यामि कदा लप्स्या ३४
म्यहो धनं ३५ एवं धनाशयाविष्टं तया नः पुनःपुनः शय्यायां जागरूकोऽसौ निशीथं समपद्यत ३६ ॥इतिश्री

पद्मपुराणे क्रियायोगसारे ॥सुदं उवाच॥ ...माहात्म्यवर्णने नामाष्टपंचाशत्तमोऽध्यायः ॥५८॥ ॥सूत उवाच॥ ततः स
मागतो यात्रावर्धचंद्रे दीर्घभास्करो वनं गतो गृहस्वामी द्वारदेशं समाह्वयत् गृहिणी तद्धनिं श्रुत्वा दीपान्प्रज्वा
ल्य सर्वतः विवसम वदनात्तस्मात् बुद्ध्या द्वारं समंजसा शुष्कपर्णशिरोभारं स्थापयित्वांगणे च सः वस्त्रान्युत्तार
यशीते न जलेन स्नानमाचरत् ३ ततः पाषाणपात्रे सा वन्यं पर्युषितं स्मितं बुभुजे शुष्कपर्णानां ज्योत्स्नया कृत
दीपकः ४ मार्त्तिकेनैव पात्रेण जलं पीत्वा सुखी तले तद्वेषेण करौ पादौ मुखं प्रक्षाल्य सर्वतः ५ ततो गत्वा स्व
पर्यंके बहुजीवसमाकुले तत्रास्तरकथा शून्ये निम्ने निरुपबर्हणे ६ कंबुकावरणे शीर्णे कदि स्पृष्टधरातले
ततो गत्वा सुनंदापि सुष्वाप स्वगृहांतरे ७ अथारुणोदये काले शीघ्रमुत्थाय सत्वरः भारसाहित्यमादाय ता
मां त्र्ययो यो वनं ८ गते तस्मिन्सुनंदा च कृत्वा शौचविधिं सती संमार्जनोपलेपादि प्रातःपूर्वकर्म माचरत् ९ त
द्दृष्ट्वा महदाश्चर्यं ज्ञात्वा सा सारिकं सुखं स्वयं विचारयामास सकलं दिवसाधनं १० पश्यताहो महाश्चर्यं दंपत्योः
सहधर्मिणोः पत्नी शांफलं भुंक्ते पतिःक्षफलमीदृशं ११ मातास्त पितरमात दंपती प्राग्भवे कृतं तेक
र्म सदा वेद्यान्वितं तत्फलं १२ स्वकर्मणा सुनंदा सौ भुंक्ते संसारिकं सुखं गृहस्वाम्यपि वेश्यो सौ न तदा प्राप्तिदिक्षः १३

तपोविद्याकुलाचारनीतिसाधनविक्रमाः भवंति यद्विनाव्यर्थास्तदहं न तोस्म्यहं १७ अहं च बलि
प्र॰ श्री॰ नायेन पुरान्निर्वासितः स्वकात् धनलोभेन तत्पश्चेकथमंतं करिष्यति सदास्य तिनवामहं प्राण
११२ प्रियतरं धनं तथाप्यत्रपतिस्थोहं तमादुःसहकारिणं विचार्यैवं समुत्थाय तामाभाष्य सत्वरं हर्ष
शोकभयाविष्टः पतस्मोतीर्थभूपतिं १९ द्विगुणं प्रचलन्मार्गे नत्नपि बलान्वितः अपि बलापित
मोसौ प्रयागं द्रागागात् द्विजः २० विष्णुशर्मा द्विजः कालेतमहं द्रुतमागतः निवेदयन् तं महामिति पत्र
कृतज्ञानात् २१ के च नो त्रुक्तनत्तसौ विष्णुशर्मा तत्तिष्ठति गंगायमुनयोस्तीरे स्नात्वमध्याह्ने जपद्विजः २
याते यावारकृत्वा किं चिद्गत्वा ततः स्वयं भुक्त्वा संध्यामठरात्रौ शेते श्रीमाधवंस्मरन् २३ इति श्रुत्वा जगाम
सौसत्वरं वेणिकातटे ध्यानास्थितं समालोक्य स्वयंस्नानं चकारह २४ संध्यामुपास्य विधिवत्तीरे कृत्वात
तःपरं त्रिवेणीमाधवं पूज्य प्रार्थयामास भक्तितः २५ श्रीमाधवदयासिंधो सर्वकामप्रपूरक यद्दिनाव
सिमेव्यंत द्वसिद्धेतवसमले २६ अथ ध्यानच्युतं वीक्ष्य तद्द्विजं तस्य सन्निधिं गत्वा नत्वा पुरः स्थित्वा द्रुचे ११२
याचकमुद्रया २७ द्विज उवाच ॥ द्विजवर्यमहाबुद्धे कस्मादहमुपागतः सीदत्कुटुंबपोषार्थं धनमिछं

स्त्रियेरितः २८ तद्धनं भूरि मे देहि दूरादागतवानहं कुटुंबपोषणं मे स्यात् तव चात्यतिकं फलं २९ इति
तद्वाचमाकर्ण्य दरिद्रस्यात्मदुःखितः संस्मरन्माधवं देवं मनसीदं विचारयत् ३० यदा वित्तं प्रपद्येत तदा
चित्तं न जायते वित्तं चित्तं प्रपद्येत तदा पात्रं न लभ्यते ३१ पात्रे विद्यमाने ऽतीर्थं नैव प्रपद्यते तत्रापि ती
र्थकोटीनां प्रयागः श्रेष्ठ उच्यते ३२ मम दैववशादद्य वर्तमानमपि त्रयं प्रथमस्य त्वभावेनावर्तमानमिवाभव
त् ३३ इदमेव हि साफल्यं धनस्य परिकीर्तितं पुण्यदेशे च काले च यत्सत्पात्रकरार्पणं ३४ मम चैवं विधं दैवं
मेतस्मिन्तीर्थभूपतौ धनमस्मै प्रदास्यामि यावित्तं मनसीप्सितं ३५ अयो वा च दरिद्रोहं न द्रव्यं मामके
गृहे किं विद्या तं मया नित्यं दीयते ब्राह्मणाय यत् ३६ तद्गृहाण त्वमेवाद्य दयां कुरु दयानिधे इति स्व
त्वा च तस्य कृष्णशर्मा ब्रवीद्वचः ३७ संकल्प्य देहि तद्द्रव्यं यत्रस्यां कृतं चित्तव तथाह्यपागृहीत्वा तद्
मिथ्यामि यथासुखं ३८ ॥ विष्णुशर्मो वाच ॥ कृष्णशर्मन्वदाश्चर्यं कुत्र मे किं धनं कियत् कथं वा कुतश्र
यातं ज्ञातं च भवता कथं ३९ ॥ कृष्णशर्मोवाच ॥ विष्णुशर्मन्नहं पत्न्या चोदितः सीदमानया द्विपर्हिंस
मालं व्यस्य पुरान्निर्गतो बहिः ४० ततो विदूरे गत्वाहमेकास्मिन्नगरे शुभे मध्याह्ने योगेन वैश्यगेहं ग

तोस्मद्गृहे ॥२९॥ तद्गेहे नीमदातिथ्यं भक्ष्यभोज्यसमन्वितं चकार शयनं तं सा विष्णुशर्मन्यशायिनो ॥३०॥
प्र.श. तिश्रीपद्मपुराणे प्रयागमाहात्म्ये गुप्तदानप्रशंसानिरूपणं नामैकोनषष्टितमोऽध्यायः ॥५९॥ कृष्णशर्मोवाच ॥
२१२ अथ तस्यां प्रसुप्तायां तद्गृहं परमर्द्धिमत् द्रष्टुं प्रवृत्तस्तत्कोणे द्रव्यभांडमलोकयं ॥१॥ ततस्तस्मादुपादातुम
हं यत्नमकारिषं यावत्तावत्समुत्थितो नागः पंचफणो महान् ॥२॥ समामुवाच दुर्बुद्धे नेदं त्वं लप्स्यसे धनं
वैश्यस्यात्र न सन्त्यास्ति तत वापि ममापि न ॥३॥ किं तु प्रयागवसतिर्विष्णुशर्माऽस्ति यो द्विजः तस्येदमखिलं
द्रव्यं विद्धि मां रक्षकं परं ॥४॥ प्रयागे प्राग्भवे तेन माघे पात्रे यथाविधि गुप्तदानं कृतं स्वल्पमपि भक्त्या कृतं
महत् ॥५॥ तीर्थराजस्य माघस्य पात्रस्य च महत्त्वतः गुप्तत्वाच्च तदेवाभूदनंतमिदमेव तत् ॥६॥ अतस्तदा त्वया
द्रव्यं दास्यामि त्वां न चान्यथा इति निर्बंधमस्याहं ज्ञात्वा त्वां समुपागतः ॥७॥ मयेदं द्रव्यलोभेन सर्वं त्वयि नि
वेदितं अतश्चोर्ध्वं विचार्यात्र यथेच्छसि तथा कुरु ॥८॥ निशम्येति वचस्तस्य विष्णुशर्माऽतिविस्मितः स्मरन्प्र
यागमाहात्म्यं प्राग्भवं च स्वचेष्टितं ॥९॥ भूयो विचार्य मनसि स्वदेवासादितं धनं भूयोऽत्र वितरिष्येऽहमस्मै ११
दत्वा च वांछितं ॥१०॥ धनं हि द्विविधं प्रोक्तं तारकं नाशनं तथा सुमार्गेण गतं त्वाद्यं कुमार्गेण गतं परं ॥११॥

तिनिश्चित्य तं प्राह कृष्णशर्मन्समं मया गत्वा त्वमानय द्रव्यं यथोपायैरिहैव तत् ॥१२॥ ततस्तेनाप्रदा
स्यामि नाहं मुंचामि माधवं स्वकुटुंबं गृहीत्वा च द्रव्यं चागम्यतां लघु ॥१३॥ कृष्णशर्मा तथेत्युक्त्वा प्रहृष्टः प्र
ययौ ततः पुनस्तद्भवनं गत्वा सुनंदामाह सांत्वितः ॥१४॥ द्विज उवाच ॥ सुनंदे त्वत्गृहे रात्रौ दृष्टं पूर्वं
मया धनं गृह्णामि तदहं सर्वं मा शोचीर्हृदयाकुला ॥१५॥ सुनंदोवाच ॥ कुत्रास्ति मद्गृहे द्रव्यं मां प्रदर्शय स
त्वरं विनिश्चित्य पुनस्तस्य प्रदास्यामि न संशयः ॥१६॥ तथा सह ततो गत्वा दर्शयामास तद्धनं सापि दृष्ट्वा तम
वदन्नैव वचनं धनलोलुपा ॥१७॥ त्वं गृहाण सिकथं विप्र मम गेहस्थितं धनं तत्रैकारणं ब्रूहि येन विस्म
समाप्नुयां ॥१८॥ एवं विवदमानायां नागस्तत्रासतत्वरं फणामंडलमुद्यम्य सुनंदामब्रवीद्वचः ॥१९॥ ना
ग उवाच ॥ सुनंदे शृणु मे वाक्यं तवैतस्य च नो धनं प्रयागवासिनो विष्णुशर्मणोऽस्याखिलं धनं ॥२०॥ तदा
त्वया गतायास्मै देहि त्वमखिलं बितं मा कुरुष्वात्र संदेहं शीघ्रं साहाय्यकं कुरु ॥२१॥ एवं नागवचः श्रुत्वा
गतस्त्रीयत्नसंशया स्वकीयशकटेष्वाप्य ददौ तस्मै मनाग्न च ॥२२॥ कृष्णशर्माऽधनं प्राप्य हृष्टस्तामभिभा
ष्य च नागराजं समामंत्र्य रात्रावेव जगाम ह ॥२३॥ अंजसा स्वगृहं गत्वा गृहीत्वा स्वकुटुंबकं प्रयागंप्रा

प्यतमेहं जगामाशु प्रहर्षितः ॥ २४ ॥ धनं निवेदयामास तस्मै विष्णुशर्मणे सोऽप्यस्मै सत्यसंतुष्टो
प्र·श· ददावर्धं धनं द्विजाः ॥ २५ ॥ उभावपि प्रयागे तौ स्थित्वा धर्मपरायणौ स्वकुटुंबाविरोधेन धर्मकार्या
११४ णि चक्रतुः ॥ २६ ॥ बहुदानानि पुण्यानि ददतुस्तौ यथाविधि अनिवारितमन्नं च पुण्यकाले विशे
षतः ॥ २७ ॥ गोदानादिक्रियाः सर्वा लक्षहोमादिकास्तथा तिलपात्रप्रदानानि चक्राते च यथाविधि
॥ २८ ॥ उद्वाहं द्विजकन्यानां बहूनामुपनायनं पोषणं च दरिद्राणां सेवनं रोगिणां तथा ॥ २९ ॥ ग्रीष्मे ज
लप्रदानं च वर्षासु जलवारणं ददतुः परया भक्त्या शीते शीतनिवारणं ॥ ३० ॥ रोपणं पुष्पवाटीनां तु
लसीनां तथैव च कृत्वा तदुद्भवैः पुष्पैः पत्रैश्च तुलसीदलैः ॥ ३१ ॥ प्रत्यहं चक्रतुर्भक्त्या वेणीमाधवपूज
नं गंधैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैस्तथा ॥ ३२ ॥ तथैव लक्षपूजाभिर्दंपतीपूजनेन च तोषयामास
तुर्देवं माधवं वरदं प्रभुं ॥ ३३ ॥ सस्नतुर्माघमासे तु प्रयागे हृष्टेन वर्तिना प्रयागमाघमाहात्म्यं शृण्व ११४
तौ तीर्थवासिनः ॥ ३४ ॥ इत्यादिधर्मसंयुक्तौ तीर्थसेवागतैनसौ पंचत्वं जग्मतुर्हृष्टौ द्वावेकस्मिन्नेव वा
सरे ॥ ३५ ॥ गरुडध्वजशोभिष्ठं चंद्रसूर्याग्निसन्निभं भ्राजिष्णु वैष्णवानीतं विमानमधिरुह्य तौ ॥ ३६ ॥ क

स्यकुमौ त्यक्तदेहौ रमे रम्ये हृष्टौ दिवि भासितौ नृत्यगायनसंयुक्तौ वैकुंठभवनं गतौ ॥ ३७ ॥ दरिद्रेण विष्णुश
र्मा च कल्याणशर्मा तु वामतः तस्यैव माधवदेवस्य सा हि माधवरूपिणौ ॥ ३८ ॥ [illegible] माहात्म्यं
साख्यातं मे निरूपितं सर्वदानवरिष्ठं तद्रिसा ह्यप्यकारणं ॥ ३९ ॥ अतः करोति यस्तिं [illegible] दानं प्र
शक्तितः प्रयागे मानवो नित्यं तत्र रतमाधवः स्वयं ॥ ४० ॥ इति श्रीस० गुप्तदानमाहात्म्यवर्णनं नाम षष्ठोऽध्या
यः ॥ ६ ॥ सूत उवाच ॥ अथ यान्यदपि वक्ष्यामि भगवत्प्रीतिकारणं प्रसंगसारितं दानं शृणुतामल
बुद्धयः ॥ १ ॥ ब्रह्मणा देवमुख्येन ऋषिभ्यः कथितं पुरा शौनकेन समं कार्यं भीष्मेण ज्ञातपूर्वकं सर्व
स्वदानं सर्वार्थप्रोक्तं कस्यापि याहृतं निष्कामेन कृतं भक्त्या विष्णुसामीप्यसाधनं ॥ २ ॥ कर्तुं विनाधिक
तेन्य मे कले न विशेषतः विधिना विधिना वापि फलाधिक्यं विधीयते ॥ ३ ॥ वस्त्रपात्रं धनान्नानि मुक्ता
विद्रुमभूषणं दद्यात्कौ परस्करं सर्वं द्विजेभ्यो गृहमंतरा ॥ ४ ॥ दद्यात्सकलं देयं के विदान्नाहि जे स्वया
वस्त्रद्वयं तु संस्थाप्य प्रतिजीवं न वाधिकं ॥ ५ ॥ विधिना येन कर्तव्यं दानं सर्वस्वनामकं वदामि तं विधिं
सर्वं शौनकाद्या महर्षयः ॥ ६ ॥ शुभकाले शुभे देशे स्ववाग्रहोदये सति द्विजानाहूय मतिमान्संकल्प

प्र॰श॰ तु समाचरेत् ॥ ततो गणपतिं पूज्य षोडशैरुपचारकैः श्रीविष्णुं माधवं पूज्य प्रार्थयेद्भक्तिभावतः ॥१॥
नमस्ते देवदेवेश शंखचक्रगदाधर नमस्ते पुंडरीकाक्ष भक्तानुग्रहकारक ॥२॥ लक्ष्मीकांत नमस्तुभ्यं मधु
कैटभमर्दन माधवानंत विश्वेश भक्तकामामरांघ्रिप ॥ कृष्ण विष्णो हृषीकेश सच्चिदानंदविग्रह क्षीरा
ब्धिशयनानंत वासुदेव नमोस्तु ते ॥ यन्मया संचितं द्रव्यं सकलं विविधं प्रभो तत्प्रयच्छामि विप्रेभ्यो सर्वस्वं
प्रीतये तव ॥ ब्राह्मणान् अथ संपूज्य दद्यात्तेभ्योखिलं स्वयं स्वबंधुभ्यो यथा हृष्टं तद्धृद् एहीयुस्त एव वा ॥ ततः
कर्मार्पणं कुर्याद्देवं यः कुरुते नरः वांछितं फलमाप्नोति वैकुंठमधिरोहति ॥ अहमस्य फलं वक्तुं नालं वर्ष
शतैरपि अन्येषां तु कथा का वा ब्रह्मणैवमुदाहृतं ॥ प्रयागे पुण्यक्षेत्रे कृत्वा देतत्संपद्यते यदि माधवस्य प्रसा
देनैतद्दत्तं यं भवेत्तु वै ॥ नैतद्दानभवं पुण्यं लिखितं वक्तुमीरितुं कुतश्चीर्णभवानंत जिह्वस्तु भु प्रभविष्णवः
॥ सर्वस्वदानमाहात्म्यं सविधानं निरूपितं भवद्भ्यो भक्तिमद्भ्यो वै मया व्यासमुखाच्छ्रुतं ॥ ...
सम्यगुक्तं त्वया सूत दानं सर्वस्वसंज्ञकं धनिनः संभवेदेतद्दरिद्रस्य कथं भवेत् ॥ ... सत्यमुक्तं मु ११५
निश्रेष्ठाः स्याप्यत्र न कारणं धनित्वं वा दरिद्रत्वं सर्वस्वमुभयोः समं ॥ अस्मिन्नर्थे पुरावृत्तं प्रवक्ष्यामि कथा

नकं पठनाच्छ्रवणाच्चास्य दानपुण्यं लभेन्नरः ॥ जनस्थाने शुभस्थाने विप्रः श्रीपतिनामकः कुटुंबीध
नवान् ज्ञाता धर्मनिष्ठोतिबुद्धिमान् ॥ आसीत्तस्य मतिर्जाता चरमे वयसि द्विजाः प्रयागतीर्थयात्रायां पू
र्वपुण्यसमुद्भवा ॥ ततोसौ द्विजवर्यो न विधाय गमने विधिं ज्येष्ठपुत्रं सपत्नीकं गृहे तात्स्थापयत्ततः
॥ बहुलं धनमादाय पदासीदासस्समावृतः ॥ बहुभिः शोभनेहनि ततः स नगरात्स्वकात् ॥ ता वितानयना
मासीत्कुलपतेः प्रातिवेशिकः तत्तीर्थगमनं श्रुत्वा सोपि श्रीपतिमन्वगात् ॥ गृहागमनपर्यंतं करिष्ये न
प्रतिग्रहं एवं नियममापेदे श्रीपतिः शास्त्रकोविदः ॥ जयोपि नियमं चक्रे नाहं यावद्गृहागमं आशया
कस्यचिच्छ्रौरं करिष्यामीति सुव्रताः ॥ इत्यादि नियमापन्नावुभौ श्रीपतिनापितौ यात्राधर्मानुसारेण ज
ग्मतुस्तीर्थभूपतिं ॥ प्रयागं प्राप्य तु रात्रौ वेणीतीरं समागतौ स्नानं कृत्वा विधानेन स्थितौ तौ रात्रिमिलापिणौ
॥ तदा विचारयामास श्रीपतिः संशयान्वितः रात्रौ क्षौरनिषेधो हि सर्वत्र खलु दृश्यते ॥ दिवा वा यदि र
वा रात्रौ गंगां प्राप्य सरिद्वरां मुंडनं येन कुर्वीत स भवेत्पितृघातकः ॥ प्रयागे तु विशेषेण रात्रावहनि संध्य
योः निषिद्धेपि दिने कुर्यान्मुंडनं न विचारयेत् ॥ इत्यादि वचनाधारात्क्षिप्रं तु निशि मुंडने गंगायमुनयो

प्र०मा०
११८

क्षौरे दिवाकीर्तिसमाहूयत ॥ यदा स कोपि न प्राप्तः सर्वे स्वस्वगृहं गताः तदा चिंतामनुप्राप्य श्रीपतिर्जयम
ब्रवीत् ॥ ३६ ॥ श्रीपतिरुवाच ॥ जयागच्छ कुरु क्षौरं रात्रौ नान्योस्ति नापितः प्रीतं मां बाध्यते त्वयैः सकुटुंबं द्रयं कु
रु ॥ ३७ ॥ जयः श्रुत्वा पितृक्षौरं न चक्रे व्रतमास्थितः तदा तं लोभयामास श्रीपतिः कार्यसाधकः ॥ ३८ ॥ कुतो न कुरुषे
क्षौरं जय मत्तः किमिच्छसि अहं तुभ्यं प्रदास्यामि सुवर्णैः क्षुरसंमितं ॥ पुत्रोपि मा त्वियः स्वर्णं तावदेव प्रदास्यति
पत्नी स्नुषा च मे तुभ्यं कनकं कर्तरीमितं ॥ दासीदासाश्च सर्वेपि दास्यंति हि यथोचितं त्वमेवातः कुरु क्षौरं
दरिद्रोसि प्रियोसि मे ॥ रात्रौ न प्राप्यते कश्चिन्नापितः परिशोधितं अतस्त्वत्प्रार्थनां कुर्वे न निराकर्तुमर्हसि
॥ ४२ ॥ सूत उवाच ॥ प्रलोभितोपि तेनैवं नापितः स जयाभिधः संकल्पबाधनिर्भीतः लुलुभे न दृढव्रतः ॥ ४३ ॥
॥ इति श्रीपद्मपुराणे प्रयागमाहात्म्ये सर्वदानप्रशंसानतरूपिणे एकपंचा... ॥ ६१ ॥ सूत उवाच ॥ श्रीपते
र्वचनं श्रुत्वा दरिद्रोपि स नापितः यो वा को वा प्रभविता कर्ता त्राता हरः क्रियां ॥ नाहं जाने क्षौरकर्म विस्मृतोस्मि
न संशयः मासमात्रमनभ्यासात् ... त्वत्कृते क्षौरक्रिया भूयः कथं कार्या पि जानता दरिद्रो वास
मृद्धो वा नियमस्य च पालनात् ॥ ३ ॥ समग्रं फलमाप्नोति माधवस्य प्रसीदति सर्वेपि धनिनः संति दरिद्रा नैव संति
स्व

किं ॥ ४ ॥ उभयोरपि दत्तेसौ सर्वतो माधवः फलं दिष्ट्या यत्तं धनं पुंसां दिष्टं नानाविधं स्मृतं ॥ दिष्ट्या तेन
वित्तेन कुर्वन् कर्माश्नुते फलं अतो नैव करिष्यामि भवता लोभितोप्यहं ॥ वृथा मा कुरु निर्बंधं सत्यं त्वं बहुना
पिताः ॥ सूत उवाच ॥ इति तन्निश्चयं ज्ञात्वा न्यवर्तयन्नाच नापितं ॥ तमाहूय चकारासौ सर्वेषां मुंडनं त
दा धनं च बहु धातस्मै वस्त्रादिकं विशेषतः ॥ चक्रे जयोपि तेनैव क्षौरकर्म यथोचितं ततः स्नानविधा
नेन वेणीतीरे स्थिताः सुरे ॥ अथ प्रभाते संजाते प्रातःस्नानं विधाय ते दानानि बहुशो दत्वा चक्रुः श्रा
द्धादिकं ततः ॥ माघस्नानं ततश्चक्रे श्रीपतिर्नापितस्तु सः यथाविधि यथाशक्ति मासमात्रं निरंतरं ॥
माघांते पूर्णिमायां वै विधाय सकलं विधिं सर्वस्वदानं कर्तुं ... निश्चितवान् ... सकलं द्रव्यं
सखा ले कराणादिव ... संकल्पविधिवद्ददौ ... सुजनाः सर्वे श्रीपतिं दानक
र्मणा त्यक्तसर्वं माधवप्रीत्यै सर्वस्वं प्रददावसौ ॥ दृष्ट्वा तदद्भुतं कर्म श्रीपतेर्नापितोपि सः सर्वस्वं दा
तु मारेभे पितृपैतामहार्जितं ॥ काष्ठानि यस्याः क्षुरास्ताह्निकाः कर्तर्यो विविधास्तथा केशोल्लंचनकार
ण्यानि क्षुरं तनिका तथा ॥ १६ ॥ आदर्शो जलपात्रं च सर्वे चाधारस्य चर्मजः एतत्सर्वं समादाय विप्रेभ्यो दात

MEMORIAL

प्र·श·
११८

मुद्यतः ॥ कोपिनप्रतिगृह्णातितस्यसर्वस्वमर्पितः चक्रेनिषेधंसर्वोपितंचनिर्भर्त्सयन्रुषा ॥ गं
गायमुनयोस्तीरेत्रिरात्रंकृतामुना प्रत्येकंप्रार्थयामासतथाप्याददेकोपिन ॥ ततोभूत्वानिराशो
सौदारिद्र्याद्दतिदुःखितः विललापस्वरेणोच्चैः पतित्वावेणिकातटे ॥ नापितउवाच ॥ अहोपश्यतमे
पापविततिंदुष्कृतात्मनः निष्पापदुर्गतत्वंवैययानीतोदशामिमां ॥ आदौशूद्रकुलेजन्मततोदारिद्र्य
मद्भुतं इदंकस्यफलंह्येतंममपातकमंतरा ॥ किमिदानींकरिष्येहंगमिष्यामिकुतोत्रतः पातयिष्येनिजं
देहंजीवमास्येतिनिश्चितः ॥ गृह्णातिजनकोपीदंसर्वस्वंसंकल्पितंकथं विचार्यैवंनिविद्गेपगंगायमु
नयोस्तटे ॥ निक्षिप्येवंस्वसर्वस्वंभक्त्यात्रिपुरुषार्जितं व्रतंचानशनंकृत्वासंस्थितोदृढनिश्चयः ॥ त
तोमाधवदेवोसौकरुणामयविग्रहः वृद्धब्राह्मणरूपेणसमागत्यजगादतं ॥ माधवउवाच ॥ कुतस्त्व
मत्रसंतोसिकिमर्थंपरिखिद्यसे शीघ्रंकथयसर्वंमेकोवासित्वंकिमिच्छसि ॥ दैवात्समागतायेवश्रीवे ११८
णीमाधवोतिके कृतकृत्याभवंत्येतेयथास्वर्लोकवासिनः ॥ अत्रतिष्ठंतियेमर्त्यास्तेमर्त्याऽमर्त्यरूपिणः
मेवदुःखलवस्तेषांयथावैकुंठवासिनां ॥ त्वंतुदुःखातिसंतप्तःशोचमानश्चदृश्यसे स्वामवस्थामतोब्रू

हिमह्यंमास्तुविलंबितं ॥ नापितउवाच ॥ जनस्थाननिवासीवैनापितोहंजयाभिधः अत्रश्रीपतिनाम्ना
केयात्रार्थंवैसमागतः ॥ धनिनातेनसर्वस्वमत्रदत्तंयथाविधि तद्गृहाणंद्विजैःसर्वैःप्रहृष्टेनांतरा
त्मना ॥ ममकोपिनगृह्णातिसर्वस्वंब्राह्मणःप्रभो अतोदारिद्र्यदुःखेनविलपामिमुहुर्मुहुः ॥ सूत
उवाच ॥ आकर्ण्येत्थंवचस्तस्यमाधवोद्विजरूपभाक् उवाचैनंप्रसन्नात्मास्मयमानमुखांबुजः ॥ द्विज
रूपउवाच ॥ सर्वस्वंकिंददासित्वंतन्मह्यंदेहिसत्वरं गृह्णाम्यहमशेषेणदरिद्रस्यविशेषतः ॥ नापित
उवाच ॥ नशक्तस्त्वंमयाब्रह्मन्पूर्वंदुष्कृतकर्मणा अतःसंस्थापितंभूमौसर्वस्वंतत्गृहाणभो ॥ सूतउ
वाच ॥ इत्याकर्ण्यवचस्तस्यान्वेषयामासतत्द्विजः नलेभेतत्रकिमपितदाप्रोवाचनापितं ॥ ब्राह्मणउवाच
नापितत्वंमृषावादीकिमप्यत्रनदृश्यते तच्छ्रुत्वापश्यतांतत्रतावुभावपिसर्वतः ॥ अदृष्ट्वासौमहद्दुःखंप्राप्य
मूर्छांजगामह तावन्माधवदेवोसौप्रत्यक्षःसमजायत ॥ उवाचमधुरंवाक्यंजयमुत्थाप्यसादरं ॥ माधव
उवाच ॥ माधवोहंमयासर्वंत्वत्सर्वस्वमुरीकृतं ॥ भक्त्याप्रियोसिमेनूनंश्रीपतेरपिमाशुचः ॥ सूतउवाच ॥
ततोविमानमानीयतत्रश्रीपतिनापितौ ॥ तत्पत्नीचस्वयंस्थाप्यमुनिनायनिजंमंदिरं अतःप्रयागेयोदद्या

ह्वानं सर्वस्वसंज्ञकं ६२ सर्वदो माघवस्तस्य सत्यं सर्वस्वदो भवेत् एवं सर्वस्वदानस्य माहात्म्यमनुवर्णितं ६३
प्र·श· अन्यान्यपि च दानानि काम्यानि विधिपूर्वकं प्रयागेति प्रशस्तानि वदिष्ये परमर्षयः ६४ इति श्रीपद्मपु
११८ राणे प्रयागमाहात्म्ये सर्वस्वदानविधिनिरूपणं नाम षष्टितमोऽध्यायः ॥ ६२ ॥ सूत उवाच ॥ फलदानं महाकाम्यं पु
त्रप्राप्तिकरं परं कौसल्यायै वसिष्ठेन मुनिना प्रागुदाहृतं १ यद्दानाज्जायते पुत्रः कौसल्यायास्तु देवसा वसि
ष्ठं प्रार्थयामास दंडवत्प्रणिपत्य च २ कौसल्योवाच ॥ भगवन्सर्वशास्त्रज्ञ सकलं त्वत्प्रसादतः मय्यस्ति न तु
पुत्रोऽस्ति तदुपायं वदस्व मे ३ वसिष्ठ उवाच ॥ वदाम्यहमुपायं ते पुत्रप्राप्तिकरं परं फलदानविधानेन द्विजेभ्यः प्र
त्यहं कुरु ४ पुण्यमासे समारभ्य यावद्वर्षं सदक्षिणं कौसल्ये फलदानेन भविता ते सुतो हरिः ५ तथेति तं प्रति
श्रुत्य गृहं गत्वा चकार सा नानाफलप्रदानं यत्नेनाभूद्राघवः सुतः ६ यदा पुनः स गतवान्हन्तुं रावणराक्षसं
तदा पितृद्वियोगार्ता फलदानोत्तमापसा ७ फलदानमतः श्रेष्ठं मुनिभिः समुदाहृतं वर्षमात्रं तथा कुर्यात्स
त्पुत्रं प्राप्नुयादसौ ८ प्रयागे माघमासे तु मासमात्रमपि द्विजाः अथवैकदिने भक्त्या कुर्वन्नाप्नोति सत्सुतं ९ ११८
ऋषय ऊचुः ॥ फलदानं कथं कार्यं कानि तानि फलानि च ब्रूहीदं सकलं येन कर्तव्यं भूयाद्दलं फलं १० सूत

उवाच ॥ सदक्षिणानि सान्नानि वस्त्रेणाच्छादितानि च तथा षोडशसंख्याकान्यसंख्यानि च वा ११
संकल्प्य फलमुद्दिश्य ब्राह्मणाय यथाविधि प्रदद्यान्नैव कुर्वीत पात्रापात्रपरीक्षणं १२ श्रीफलं नागरिंगं
च खर्जूरं दाडिमीफलं क्रमुकं मातुलिंगं च कूष्मांडं कर्कटीमपि १३ जातीफलं कदलीयमाम्रं जंबूफ
लानि च निंबूफलं बादरं च मिष्टमन्यच्च यत्फलं १४ प्रदेयानि यथालाभं माघे पुण्यफले कुना तेन पु
त्रफलावाप्तिर्भवत्येव न संशयः १५ एवं तांबूलदानं च प्रशस्यो सर्वकामदं नानाभोगप्रदं माघे कुर्वन्कु
र्वीत किल्बिषात् १६ ऋषय ऊचुः ॥ तांबूलस्य प्रदानेन कस्मात्कुर्वीत किल्बिषात् वदा वद वदाम्यं प्र
मुनिर्येन नैमं भवेत् १७ सूत उवाच ॥ तांबूलभक्षणेनैव यत्पापं जायते नृणां तत्पापप्रशमायैव कुर्वीत तां
बूलदानकं १८ पत्रमूलाग्रनाडीनां चूर्णपत्रस्य भक्षणात् रात्रौ खदिरसारस्य पापाद्दारिद्र्यमाप्नुते [illegible]
अन्त्यतस्तापनाशार्थं दारिद्र्यप्रशमाय च पुंसि संवत्सरं कुर्यात्तस्य दानं विधानतः [illegible] मासमेवमृतं [illegible] प्र
यागे प्राप्य दुर्लभं कर्तव्यं तेन विधिना विशेषफलसिद्धिना २१ [illegible]
पूर्णयां कुंभसंक्रांतौ पौष्यमि[illegible] २२ सौवर्णं राजतं तांम्रं पित्तलं वा विचित्रितं यथाशक्ति वि

निर्माय पर्णाधारं मनोहरं २३ ततः सौवर्णपत्राणि राजतानि फलानि च वैडूर्यखदिरस्थाने कर्पू
भ·शा· रस्य च मौक्तिकं २४ पर्णसंख्यानु विज्ञेया सहस्रं शतमेव वा घोरा खादिर चूर्णानि तद्योग्यानि प्रक
११९ ल्पयेत् २५ यद्वा तांबूलपर्णानि सफलान्यग्निशाक्तितः यथा संख्यानि चादाय स्थापयेत्तत्र भाजने २६
गलंती विविधाः कृत्वा तत्र पूगीफलादिकं सर्वं निक्षिप्य साहित्यं तत्रैव स्थापयेत्सुताः २७ जातीफल
लवंगैला जातीपत्राक्षिप्ताः [illegible] नयेत्तत्र च किंकिणीजालभूषितं २८ चित्रवस्त्रेण चाच्छाद्य सर्व
मेतत्समर्पयेत् सपत्नीकाय विप्राय दद्यान्मंत्रेण भक्तितः २९ यथा सोपस्करं तुभ्यं दत्तं तांबूलमुत्तमं गृ
हाण कुरु मा पापं द्विजवर्य नमोस्तु ते ३० पर्णमूलाग्रनाडीनां चूर्णपत्रस्य मोहतः रात्रौ खदिरसारस्य
पत्रस्य भक्षणं कृतं ३१ शय्या राजपथादौ च चैत्यागारे सुरालये तांबूलं पत्रमयाभुक्तं शय्यायां वाप्य
साहिके ३२ ततो जातं च यत्पापं दारिद्र्यं च ततो प्रियं तत्सर्वं नाशमायातु माधवस्य प्रसीदतु ३३ एवं
यः कुरुते दानं नरो नार्यथवा द्विजाः प्रयागे माघमासे तु मुच्यते पातकादसौ ३४ आयुरारोग्यसौभाग्यपु ११९
त्रपौत्रधनादिकं लभते विविधान्भोगानिह स्वर्गे च पुष्कलान् ३५ साहित्यकारणं शक्तौ पूगीफलयुता

निच पर्णान्येव यथा संख्यं प्रदेयानि द्विजातये [illegible] स्वयमेव समर्थानि मासवल्लीदलान्यलं कि
मुक्त्वा गौरि युक्ता मिमं दोष मिमां स्रोत [illegible] तांबूलदानं विधिवद्देवं वः संप्रदाहृतं कथयामि किमन्य १२०
[illegible]
[illegible] तांबूलवल्ली प्रोक्ता
सा कामगवल्ल्यभिधा कुतः संज्ञा येति समुत्पत्तिं तस्याः कथय [illegible] नागवल्ली समु
त्पत्तिं शृणु धर्मज्ञो नारद [illegible] गुणदा [illegible] दाद्देवासुरैः पार्थ मथि
तः क्षीरसागरः निःसृतानि ततस्तत्र [illegible] नि यस्यायं [illegible] स
तः सोदृष्ट्वा वंचयन्दैत्यानमृतं स्नानपायसं तु पीतशेषामृतघटं विष्णुर्दिदृक्षया नंदते समस्तदेव
कार्यार्थं स्थापयामास गोपितं [illegible] ऐरावतस्य नागेंद्रो बद्धस्तत्रैव तिष्ठति तद्दानात्स्वलंसंयोगाद्देवेका
ममभूद्धने ६ सा वर्धते लता रम्या प्रत्यहं नवपल्लवा तदुद्भवानि पत्राणि ददुर्विंद्यमुदा काः ७ कोम
लानि सुगंधीनि तस्याः पत्राणि वासवः धन्वंतरिं समाहूय तन्नामादि तृतीयपृच्छत ८ स होवाच देवेंद्र त

दुत्पत्तिंनिशाम्यच तेषांगुणंचदोषंच चिकित्सकशिरोमणिः … अद्भुतेयंलताजाता
प॰श्रा॰ महेंद्रनवनंदने अमृतस्यवनागेंद्रदानस्यवशातःशुभा १ नानारोगहरापथ्याजातापीयूषयोगतः
१२० दानयोगाद्रसोदिव्यामादकानंगवर्धिनी ११ नागवल्लीतिविख्यातिंनागालयसमुद्भवा यास्यतेसर्व
लोकेषुविख्यातिंचावधारय १२ पूगखादिरचूर्णानांयोगात्तांबूलनामतां प्राप्स्यतेसोशचीकांतत्रपोदश
गुणान्विता १३ ततोलेखर्षभःप्रीत्याकृत्वातांबूलमद्भुतं तस्मैपुलोमजायैचदत्वा…यमभक्षयत् १४
भक्षयित्वाचतांबूलंमुखसौरभ्यकारकं अनंगवर्धनंस्वादुसर्वेहर्षमुपागमन् १५ नागवल्लीततःशक्रो
नानोपायैररक्षयत् अमृतादिपि सावै नसापितं… १६ कदाचिन्नृपतिःशौरिःसुधर्मायां
जगामह तांबूल… … भूपालेप्रसन्नः … प्रत्यहं
यासिशौरेत्वंअमरैनायतेमत… …गकच भूमौ… त्वमे
बुध्याशौर्यादिकैर्गुणैः १८ भूयःप्रसन्नेदेवेंद्रेकदाचित्कोरब्रवीत् … दत्त्वैतानिमघव १२०
नागवल्लीदलानिमे २० संकं… गुनिदलान्यस्मैततोदत्तानिजिष्णुना शौरिरानीयतान्यत्ररोपयत्त्व(?)

वनेशुभे २१ तत्रापिववृधेत्यंतंसावल्लीजलसेचनैः तदुद्भवानिपर्णानितांबूलीकृत्यजद्दाति २२
सचान्यस्मैसचान्यस्मैसचान्यस्मादितिक्रमात् दत्वाप्रचारयामाससमस्तेक्षितिमंडले २३ प्रमत्ताश्चभ
वन्सर्वेभोगितांबूलभक्षणात् वर्णाश्रमक्रियाःसर्वास्तुत्यक्त्वा…तदा २४ ततोदेवगणाःसर्वेयज्ञ
भागविवर्जिताः पीड्यमानाःक्षुधार्ताश्चगत्वाप्रोचुःपितामहं … मर्त्यलोकेसुरज्येष्ठनष्टाध
र्मास्तथाध्वराः उन्मत्ताःसकलालोकाजातास्तांबूलभक्षणात् २५ तस्मात्कुरुप्रसादंनोयेनास्माकंसुखं
भवेत् इतिदेववचःश्रुत्वाब्रह्माचेसस्मिताननः २७ किंचित्कालंप्रतीक्षध्वंयज्ञभागान्भजिष्यथ इतिब्र
ह्मवचःश्रुत्वासर्वेदेवाःप्रहर्षिताः २८ मत्वास्वकार्यसंपन्नंजग्मुःस्वस्वगृहान्मुदा ध्यायंतःसंस्थिता
नित्यंकदालप्स्यामहेसुखं २९ कदाचिदथदारिद्र्यंभूमिलोकेतिपीडिते तस्मिन्कृतयुगे(?)… शौरिरीशा
सतिराजनि ३० सर्वेपिसुखिनोलोकाधनवंतःशतायुषः नदरिद्रस्तदाकोपिचतुर्वर्णेषुदृश्यते ३१
तदाविप्ररूपेणदारिद्र्यंब्रह्मणोंतिकं गत्वानत्वाततस्तस्मैव्यसनंस्वमवोचत ३२ … प्र
न्मभूमंडलेक्वापिमयास्थानंनलभ्यते तांबूलभक्षणात्सर्वेप्रमत्ताधनिनोभवन् ३३ काहंवसामित

तद्ब्रूहि सस्त्रीकः ससुतः प्रभो कर्तुं वांछते तत्कथं किं करोमि पितामह ३४ ॥ ब्रह्मोवाच ॥ स्थानं तस्यं
प॰श॰ प्रदास्यामि किमर्थं परिखिद्यसे सकृत्कर्तुं यस्य तांबूलं भवेद्दातं ददतो यथा ३५ तांबूलं भवता वासो यथा
१२१ योग्यं कर्तुं विना कर्तव्यः क्रमशः पश्चात्सर्वत्रापि करिष्यसि ३६ चूर्णपत्रे त्वया स्थेयं कर्तुं ध्यानवमर
थ्यया पर्णाग्रे पर्णमूले तु कलहेन सुतेन ते ३७ इधायास्तव पुत्रास्तु पर्णे नाडीषु संस्थितिः त्वा
स्तांखदिरसारे तु राज्ञो समुद्रिताः स्थितिः ३८ इति ब्रह्मवचः श्रुत्वा विज्ञो भूलोकमागतः अवासत्कर्तुं
वोसौ तांबूले च यथायथं ३९ तदारभ्य जना ये ये भुक्तांबूलं भक्षकाः ते सर्वे पापिनो भूवन्दरिद्राश्च
सहस्रशः ४० स्नाननेत्रे स्नाननेत्रावापि महादोषस्य शांतये प्रागुक्तविधिना दानं कर्तव्यं पापभीरुभिः ४१
तस्माद्विचार्य तांबूलं भक्षणीयं विवेकिभिः अन्यथा पातकोत्पत्या दारिद्र्यं भवति ध्रुवं ४२ ब्रह्मचारी च वि
धवा सन्यासी च रजस्वला त्यजेयुर्नियतं ह्येते तांबूलं न परे जनाः ४३ गृहस्थाः सधवा स्त्रीया नुपेता बा १२१
लकादयः अवश्यं भक्षयंत्येते तांबूलं श्रीकरं परं ४४ मुखे तांबूलहीने तु शुद्धिर्नोपपद्यते तन्मुखं
तु विजानीयात्कूपलस्थवमंदिरं ४५ द्वात्रिंशत्पत्रैर्युक्तं पूगीफलसमन्वितं एलालवंगकर्पूरयुक्तं तां
बूलमुच्यते ४६ एतद्दानं प्रयागे वै यथाशक्ति यथाविधि यः करोति नरो भक्त्या समुच्यते न संशयः खिला
न ४७ अन्नदो दीर्घमायुष्यं सौमनस्यं च पुष्पदः सौभाग्यं चंदनादिभ्यो नैर्मल्यं दीपदो लभेत् ४८ ए
तत्तु यो ददाति तांबूलस्थलमेव नरः इह लोके परत्रापि सर्वदा सुखमश्नुते ४९ नागवल्लीसमुत्प
त्तिर्दानमहात्म्ययोः फलं मयानिरूपितं सर्वं किमन्यच्छ्रोतुमिच्छसि ५० ॥ इति श्रीपद्मपुराणे पातालखंडे प्रयाग
नागवल्लीसमुत्पत्तिनिरूपणं नाम चतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ऋषय ऊचुः ॥ ॥ दानानि त्वन्मुखांभोजनि
र्गतानि सविस्तरं श्रुतान्यथ वदास्माकं यज्ञा नावश्यकानिह १ के के यज्ञाः प्रकर्तव्याः प्रयागे फलमि
च्छता निष्कामेन च केऽकार्याः तत्सर्वं कथयाशु नः २ ॥ सूत उवाच ॥ सर्वज्ञास्त्वपि यूयं मां यत्पृच्छथ मुनीश्वराः
तद्धि लोकोपकारार्थं वक्ष्येऽहं प्रब्रवीमि वः ३ यज्ञास्तु त्रिविधाः प्रोक्ता वेदे कांडत्रयात्मके ज्ञानयज्ञा योगय
ज्ञाः कर्मयज्ञास्त्वनेकधा ४ ज्ञानिनो ज्ञानयज्ञैश्च योगयज्ञैश्च योगिनः यजंति माधवं देवं कर्मयज्ञैश्च कर्मिणः ५
४ प्रयागे माधवक्षेत्रे भुक्तिमुक्तिप्रदायके यज्ञाचरणमात्रेण शीघ्रं तुष्यति माधवः ६ अतएवाकरोद्ब्रह्मा
यज्ञानत्राति दक्षिणान् सर्वसाधनसंपन्नानश्वमेधाभिधानदश ७ युधिष्ठिरोऽम्बरीषश्च मांधाता नहुषस्तथा

इक्ष्वाकुर्भरतो रामस्तथा चैलः पुरूरवाः ७ एते चान्ये च राजानो ह्यृषयश्चाप्यनेकधा यज्ञान्ना
प्र·शु नाविधांश्चक्रुः स्वस्वयोग्यान्नंदिताः ८ अतोत्र ब्राह्मणश्रेष्ठास्त्वग्निष्टोमादिकान्मखान् कर्तुं श
१२२ तियथाशास्त्रात्ते वैकुंठनिवासिनः ९ अशक्तश्चाग्निहोत्रं वा प्रयागे जुहुयाद्द्विजः दर्शेष्टिं पौर्णमासे
ष्टिं पवित्रेष्टिं मृगारिकां १० चातुर्मास्यं पशुं सोमं सत्रसंस्थाश्च सौमिकाः काम्या नानाविधेष्टीश्च नवा
न्नग्रायणं तथा ११ कुर्वतां स्वस्वसामर्थ्यादेकं वानेकमेव वा यज्ञेशो माधवस्तेषां भुक्तिं मुक्तिं च यच्छति
१२ औपासने वा यः कुर्यात्स्थालीपाकं च भक्तिमान् पिंडयज्ञं च संस्थाश्च अष्टकाद्यष्टकामपि १३
सोपि तत्फलमाप्नोति यद्यज्ञैर्धनिनां फलं यद्वा पंचमहायज्ञानपि कुर्वन्न तदश्नुते १४ मासमात्रं
तु यः कुर्याद्धोमं चैतानिकं द्विजः यद्वोपासनहोमं च प्रयागे नंतपुण्यभाक् १५ सरस्वत्यानुविधि
नाप्येवमुक्तं न हुतं मासाय प्रातर्होमतुल्यं जायते वा न वा न घ्याः॥ १६ सर्वत्रैवं फलं प्रोक्तं नित्य
होमस्य निश्चितं प्रयागे किमु वक्तव्यं विशेषात्तपसि द्विजाः १७ प्रयागे यः कविर्वुण्यं श्रोतार्थानं १२२
त्कारयेत्स चातुर्मास्यानि वा भक्त्या सोमयागमथापि वा १८ तस्य पुण्यस्य मर्यादा वर्ण्यते नैको

MEMORIAL

पि नरप्रभुः यज्ञेभ्यः स्वकृतेभ्योसौ वाग्र्यं पुण्यमश्नुते १९ असामर्थ्ये त्वनाहूतः परयज्ञं च
न्तु पश्यति स्नाति चावभृथे यश्च सोप्याप्नोति महत्फलं २० ॥ऋषय ऊचुः॥ ये त्वयाभिहिताः पंच
महायज्ञा इति प्रभो के ते केन कथं कार्याः किंफला इति शंस नः २१ ॥सूत उवाच॥ ब्रह्मयज्ञो देव
यज्ञो भूतयज्ञस्ततः परः पितृयज्ञो नृयज्ञश्च पंच यज्ञाः प्रकीर्तिताः २२ स्वाध्यायो ब्रह्मयज्ञः स्या
द्देवयज्ञोग्निहोमकः भूतयज्ञो बलिः प्रोक्तो हुतशेषान्नतः २३ पितृयज्ञः स्वधा पितृभ्य इत्यं परः॥
न्नादिदानतः मनुष्ययज्ञोतिथ्यादेर्मनुष्योद्देशदानतः २४ एतान्पंच महायज्ञान्कुर्यात्प्रति
दिनं गृही यथाविधि यथाशास्त्रं तत्प्रकारः प्रदर्श्यते २५ स्नानं विधाय मध्याह्ने तत्संध्यां समु
पास्य च ब्रह्मयज्ञं ततः कुर्यात्तर्पणं तं यथाविधि २६ अन्यकाले यदा कुर्यात्स्नानाकार्यवशा
त्तदा ब्रह्मयज्ञं पुरा पश्चात्संध्यावंदनमाचरेत् २७ ततो गृहं समागत्य धौतपादकरः शुचिः
पाकादन्नं समुद्धृत्य देवयज्ञं समाचरेत् २८ औपासनाग्नौ कुर्वीत पचनाग्नावथापि वा घृता
क्तान्नेन जुहुयात्स्वस्वगृह्योक्तवर्त्मना २९ प्रातः सायं प्रकुर्वीत गृहस्थो वैश्वदेवकं प्रातरा

रं भणेन तस्य तंत्रेणोभयमेव वा १७ सायंकाले प्रदा कुर्याद्धोममात्रं समाचरेत् भूतयज्ञं च वै कु
र्यात्तत्पत्नी को न वा भुवि १८ अन्नस्य चात्मनो यो वै संस्कारार्थमिदं भवेत् केचिदन्नस्य संस्कारं पं
प॰श॰ चस्थानानिवारणात् १९ प्रतिपाकं तदावृत्तिर्द्वितीये सकृदेव तत् एकपाके तु भुंजाना वर्तंते बहवो
१२२ यदि २० एक एव तदा कुर्याद्वैश्वदेवं न वै पृथक् पाकाभावे नित्यं कुर्यात्सत्यैकमपि चान्निमे २१ पा
काभावे प्रवासे वा तंडुलैरेव तद्भवेत् अस्वारान्नां तेषां पि कार्यमित्यपरे जगुः २२ पृथक्पाकेन तत्स्या
त्स्नातकब्रह्मचारिणोः जलेन समिधा वापि संकटादिषु २३ होमाग्रदानरहितं न भोक्तव्यं कदाच
न गृहस्थो यदि भुंजीयाद्दोषमेव भुनक्त्यसौ २४ देवार्थं ब्राह्मणार्थं वा यदन्नं पाचितं गृहे वैश्वदेवेन
तत्सर्वं योग्यं स्यादन्यथा न तत् २५ एते पंच महायज्ञा येषां संति गृहे गृहे तेषामन्नं प्रभोक्तव्यं नेत
रेषां कदाचन २६ एवं विस्तरतः प्रोक्तः पंचयज्ञविधिर्मया भवद्भ्यो मुनिशार्दूलाः किमन्यच्छ्रोतुमि
च्छथ २७ ॥ इति श्रीप॰ पु॰ नानायज्ञनिरूपणं नाम पंचपञ्चतमोध्यायः ॥ ५५ ॥ ऋषय ऊचुः ॥ सूत सर्ववि १२२
धानज्ञ यज्ञा नानाविधास्त्वया अस्माभिः श्राविता येन परानंदं गता वयं इदानीं नो यथा राजेज्ञाने

त्यनैमित्तिकानि च यानि व्रतानि कार्याणि काम्यानि च गृणीहि नः १ सूत उवाच ॥ ऋषयः साधु
धु पृष्टोऽहं भवद्भिर्लोकमंगलैः यत्कृतः पुण्यसंप्रश्नः सर्वलोकोपकारकः २ नित्यं नैमित्तिकं का
म्यं नित्यकाम्यमपि द्विजाः उक्तं सर्वपुराणेषु चतुर्विधमपि व्रतं ३ तत्रादौ वैष्णवं पुण्यं प्रोक्तं वैका
दशीव्रतं प्रत्यवायश्रुतेर्नित्यं काम्यं च फलदर्शनात् ४ सर्वेषामेव वर्णानामाश्रमाणां च सर्वदा
स्त्रीणां चात्राधिकारोऽस्ति दोषस्याकरणेन वा ५ अष्टमं वर्षमारभ्याशीतिर्यावत्प्रपूर्यते ताव
द्व्रतमिदं कुर्यादुपवासात्मकं हरेः ६ शुक्ला कृष्णा च सर्वेषां समैवैकादशी भवेत् गृहीतस्त्री च
कृष्णायामनुकल्पं समाचरेत् ७ एकादशी तु कृष्णा तु चातुर्मास्यागता तु तु कुर्यादुपोषणं पु
त्री गृहस्थोऽपि विशेषतः ८ एकादश्यामहोरात्रे क्रियते यदुपोषणं नित्यव्रतमिदं प्रोक्तं परं पापप्र
णाशनं ९ अनेकनियमैर्युक्तं क्रियते त्रिदिनात्मकं तद्व्रतं काम्यमित्युक्तं नानाकाम्यफलप्रदं
यानि कानि च पापानि ब्रह्महत्यासमानि च अन्नमाश्रित्य तिष्ठंति तानि वै हरिवासरे ११ भुंजान
स्तत्र सर्वाणि तान्यश्नाति निश्चितं इति सर्वपुराणानि घोषयंति पिरं त्यहो १२ पुत्रवांश्च स

मर्थश्च बंधुपुत्रस्तथैव च उभयोः पक्षयोः काम्यं व्रतं कुर्यात्तु वैष्णवं ॥ १४ ॥ सपुत्रे गृहिभिर्नित्य
प.श. मपि विष्णुपरायणैः पक्षयोरुभयोः कार्यं सर्वदा वैष्णवं व्रतं ॥ १५ ॥ यथा शुक्ला तथा कृष्णा यथा
१२४ कृष्णा तथा सिता तुल्येति मन्यते यस्तु स वै वैष्णव उच्यते ॥ १६ ॥ पतिपुत्रवती नारी यद्यकुर्याद्व्रता
दिकं पत्या त्वयैव तत्तस्याः सर्वकामदुघं भवेत ॥ १७ ॥ या त्वभर्त्रेनन्नुज्ञाता कुर्याद्व्रतजपादिकं निष्फ
लं तत भवेत्तस्या इति शास्त्रेषु निश्चितं ॥ १८ ॥ विधवापि प्रकुर्वीत व्रतदानजपादिकं यदधीना भवेत्त
स्यानुज्ञया नान्यथा फलं ॥ १९ ॥ पुष्पालंकारवस्त्राणि गंधधूपांजनानि च उपवासेन दुष्यंति तांबूला
दि तु वर्जयेत ॥ २० ॥ सूतके मृतके चैव नित्यं रजसि च व्रतं कुर्वीत देहनिर्वन्ध्यमुपवासं न चेतरत ॥ २१ ॥
रोगादिप्रतिबंधे तु पतिपत्न्यौ परस्परं नित्यव्रतं प्रकुर्यातां काम्यमावश्यकं न तु ॥ २२ ॥ द्विजद्वारा अथ
वा कुर्यान्नित्यमेव व्रतं गृही एवं हि फलमाप्नोति काम्ये प्रतिनिधिर्न हि ॥ २३ ॥ येन केन प्रकारेण नि
त्यव्रतमलंघयन् सकलं फलमाप्नोति पातकैर्न च लिप्यते ॥ २४ ॥ क्रियानुकल्पः प्रथमो द्वितीयः का १२४
र्तरेवसः प्रथमः स्याद्विषयादिर्हि जद्धरो द्वितीयकः ॥ २५ ॥ दशम्येकादशी चेति द्वादशी च दिनत्रयं

एकादशीव्रतं काम्यं नानानियमसंयुतं ॥ २६ ॥ सायमाद्यंतयोरह्नोः सायं प्रातश्च मध्यमे उप
वासफलं प्रेप्सुर्जह्याद्भुक्तिचतुष्टयं ॥ २७ ॥ अथ नित्योपवासी चेत्सायं प्रातर्भुजिक्रियां वर्जयेन्मत्
तिमान्भक्त्या संप्राप्ते हरिवासरे ॥ २८ ॥ कांस्यपात्रभुजिं क्षौद्रं परान्नं च पुनर्भुजिं मैथुनं च दिवास्वापं तैलं
पर्यंकमेव च ॥ २९ ॥ दशम्यां वर्जयेदेतदेकभक्तं समाचरेत् अन्यांश्च नियमान्कुर्याद्व्रतसाद्गुण्यकारका
न ॥ ३० ॥ गात्राभ्यंगात्तुलेपौ च दंतधावनमैथुने दिवास्वापं च तांबूलं जलपानं पुनः पुनः ॥ ३१ ॥ भाषणं
दर्शनं स्पर्शं पतितांत्यजसूतकैः पाषंडिनास्तिकोदक्यादिभिर्नैवाचरेद्व्रती ॥ ३२ ॥ कांस्यं माषान्नृतं
क्षौद्रं तैलं वितथभाषणं दिवास्वापं पुनर्भुक्तिं परान्नं च विवर्जयेत ॥ ३३ ॥ सूर्योदयोत्तरं स्यात्तु द्वाद
शीपारणादिने उषःकाले तदा कुर्यात्प्रातर्मध्याह्निकं विधिं ॥ ३४ ॥ श्रौते यन्नैव संकोचः संकोचः स्मा
र्तकर्मणि स्मार्तपौराणकर्मभ्यः श्रौतं हि प्रबलं मतं ॥ ३५ ॥ द्वादश्याः प्रथमः पादो हरिवासर उच्यते
तमुल्लंघ्यैव कुर्वीत पारणं विष्णुभक्तिमान् ॥ ३६ ॥ इत्यादिनियमान्ज्ञात्वा कुर्यादेकादशीव्रतं एका
दशी विनिर्णीय सम्यक् शास्त्रोक्तवर्त्मना ॥ ३७ ॥ इति श्रीप. प्र. एकादशीविधिनिरूपणं नाम षड्षष्ठित

मोध्यायः॥ ६६॥ सूत उवाच॥ अथ वक्ष्ये मुनिश्रेष्ठा एकादश्या विनिर्णयं वैष्णवस्मार्तयोर्येन
ग.शा. व्रतं भवति निश्चितं १ संपूर्णैकादशी विद्धा खंडा चेति त्रिधा मता खंडायां नास्ति संदेहो द्वयोः
१२५ र्निर्णय उच्यते २ पूर्वारुणोदयं व्याप्य परसूर्योदये स्थिता संपूर्णैकादशी प्रोक्ता सूर्यात्सूर्यं प
रा तिथिः ३ अरुणोदयकाले तु दशमीलेशोपि दृश्यते सा विद्धैकादशी ह्येया परा खंडा प्रकीर्ति
ता ४ अरुणोदयवेधश्च वेधः सूर्योदये तथा द्विविधो दशमीवेधो वैष्णवस्मार्तयोः क्रमा
त् ५ अरुणोदयवेधं तु वैष्णवः सर्वथा त्यजेत् स्मार्तः सूर्योदये वेधं त्यजेदिति विनिर्णयः ६
वैखानसागमप्रोक्तां पंचरात्रादितां तथा दीक्षां यो वैष्णवीं प्राप्तः स वै वैष्णव उच्यते ७ नैका
दशीं त्यजेद्यस्तु संकटेपि परापदि जितांतरारिषड्वर्गः स वै वैष्णव उच्यते ८ समबुद्धिः सदा
लोके मित्रोदासीनशत्रुषु विष्णुरूपं जगत्सर्वं स वै वैष्णव उच्यते ९ द्रवीभूतं तु यच्चित्तं विष्णु
पादांबुजातद्वाणं चलते न स्वभावेन स वैष्णव उदाहृतः १० भेदो नैवावयोर्विष्णोरिति वाक्य १२५
मनुस्मरन् शिवे न द्वेष्टि शैवश्च वैष्णवः स हरिप्रियः ११ सत्येमरणतो बद्धो जातु यद्धृदयं ह

रिः न मुंचति तदायत्तो वैष्णवाग्र्यः स उच्यते १२ शिवादिदीक्षामापन्नः श्रौतस्मार्तक्रियापरः
प्राग्गतैर्लक्षणैर्युक्तः स्मार्त इत्युच्यते बुधैः १३ अरुणोदयविद्धायामेकादश्यामुपोषणं न कुर्या
द्वैष्णवो नित्यं स्मार्तः काम्यं परित्यजेत् १४ एकादशी द्वादशी वोभयं वा यदि वर्धते शुद्धाप्येकादशी
त्याज्या तदा विष्णुपरायणैः १५ पक्षद्वयेपि द्वादश्यां वैष्णवानामुपोषणं स्मार्तः सूर्योदये विद्धां त्य
जेन्नित्यव्रते सदा १६ शुद्धा विद्धा द्विधा त्रेधा भिन्ना न्यूनसमाधिकैः त्रिधैवैका पुनर्भिन्ना द्वादश्यूनस
माधिकैः १७ परोदयात् घटीन्यूना पलेन्यूनोदयाधिका न्यूनैः समाधिका ह्येया सूक्ष्मदृष्ट्या विचक्ष
णैः १८ षट्सु पूर्वा घपदेषु सप्तमे चाष्टमे तथा कर्तव्या गृहिभिः पूर्वा विधवायतिभिः परा १९ सकामा
गृहिभिः प्रोक्ता निष्कामा यतिभिस्तथा परास्ति लातां नवमं द्वितिश्च द्वाविनिर्णयः २० विद्धात्रये तु
पूर्वा स्याद्व्यवस्थानं तस्य द्वये सप्तमे व्यवस्था स्यात् केषु च परामता २१ ज्योतिःशास्त्रेण निश्चित्य
तिथिं तत्र व्रतं चरेत् सूक्ष्मदृष्ट्या न कुर्वीत संदेहे तु परा भवेत् २२ एकादश्यां पितृश्राद्धं भवेद्यदि मुनी
श्वराः कुर्वीत विधिवच्छ्राद्धं माघ्राय पितृसेवितं २३ अन्ये हनि तु स्नातायस्य भार्या पतिव्रता पररात्रे

रात्रं दद्यात्सोऽश्नामितिकेचन २४ एकादश्यां व्रती कृत्वा गंडूषान्द्वादशोषसि नद्यादौ विधिव
प्र॰श॰ त्प्रातः स्नात्वा संकल्पयेद्व्रतं २५ नित्यकृत्यमनुष्ठाय गत्वा गेहे शुचिस्थले विदध्यान्मंडपं तत्र पुष्पप
१२६ ल्लवशोभितं २६ तत्र संपूजयेद्विष्णुमुपचारैरनेकधा यथाशक्ति यथाज्ञानं श्रद्धाभक्तिसमन्वितः
२७ नानापुष्पैश्च माल्यैश्च तुलसीनां दलैः शुभैः धूपदीपैश्च नैवेद्यैः पूजयेत भक्तिमान्व्रती २८
विष्णुमंत्रजपैर्नानासूक्तपाठैरतंद्रितः प्रदक्षिणनमस्कारस्तोत्रपाठैर्नयेद्दिनं २९ विष्णोः समंत
तो रात्रौ दीपान्प्रबोध्य मंगलान् जागरं तत्र कुर्वीत गीतवादित्रनर्तनैः ३० वासुदेवस्य पुरतो रात्रौ
गायति यः पुमान् गांधर्वं गायनं श्रुत्वा स्थित्वा इंद्रलोकं प्रयात्यसौ ३१ जागरे तु विशेषेण पुण्यं शास्त्रेवधा
रितं धरोद्धृते वराहेण पृथिव्यै कथितं पुरा ३२ हरिजागरणे गीतवाद्यैर्नृत्यप्रबोधने तत्सर्वं यत्पुरा
वृत्तं व्यासेनोक्तं ममांतिके ३३ न योगैः प्राप्यते सा स्थिर्न तपसा च स्वधर्मतः अनायासेन तत्प्राप्यमेका
दश्यां च जागरात् ३४ नात्र दाने प्रशंसंति नाम्नां गायेन धारणा यत्फलं लभ्यते रात्रौ कृष्णं वक्राव १२६
लोकनात् ३५ नृत्यगायनवाद्यानि ये वै कुर्वंति जागरे न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि

३६ एकादश्यां निराहारो रात्रौ जागरणं नरः हृषीकेशाग्रतः कृत्वा सर्वान्कामानवाप्नुयात् ३७
तालवीणामृदंगांश्च वादयंति च ये नराः प्रसन्नो माधवस्तेषां जागरे भवति ध्रुवं ३८ पातकी पुल्कसं
कश्चिद्गीतपुण्येन राक्षसं वनांते मोचयामास कृपया मुनिसत्तमाः ३९ एवं प्रभावा बहुधा कथिते
कादशी मया संक्षेपं गाययथाशास्त्रात् किमन्यच्छ्रोतुमिच्छथ ४० ॥इति श्रीप॰ श्र॰ एकादशीनिर्णया
दिनिरूपणं नाम सप्तषष्टितमोऽध्यायः॥ ६७ ॥ऋषय ऊचुः॥ कः पुरा मोचितः केन चांडालेन च राक्षसः
गीतपुण्यप्रभावेन तत्सर्वं कथयाशु नः १ ॥सूत उवाच॥ एकस्मिन्नगरे कश्चिच्चांडालः कर्मगर्हि
तः कृमार्गी स्वधनेनैव कुटुंबं पालयत्यसौ २ सुमतिर्नाम विप्रेंद्रस्तस्यासीत्प्रातिवेशिकः त
स्य संसर्गतश्चक्रे परमेकादशीव्रतं ३ एकादश्यां निराहारो विप्रसंगेन सर्वदा रात्रौ जागरणं कृ
त्वा सम्यग्गायति भक्तितः ४ एवं प्रकुर्वतस्तस्य बहवो वत्सरा गताः ततो भूत्परमं चित्रं तन्निबो
धत सुव्रताः ५ कदाचिद्वैशुक्लायामेकादश्यामुपोषितः स्वग्निगते जने रात्रौ वीणामादाय सत्व
रं ६ जागरं कर्तुकामोसौ स्वाश्रमाद्द्विजने वने जगाम नैकगीतानि गायन्स हरिमंदिरं ७ तस्मि

व्रजतस्तस्य मार्गमध्ये ऽतिभीषणं ददर्श विकृताकारं ब्रह्मराक्षसमद्भुतं ९ व्यात्ताननं विडाला
व॰मा॰ क्षं कृशं भीमं दंष्ट्रोत्करं स्निग्धाञ्जनाभं संदृष्टपद्मानस्पृष्टभूमिकं १० ऊर्ध्वरोमाणमत्युच्चं कालदृ
१२७ न्तमिवापरं मानुषास्थिपलाहारं नखैस्तैः स्वस्थवत् ११ चलज्जिह्वोष्ठदशनं गात्रोर्ध्वशुष्कपंजरं दी
र्घतिरटमानं तं धावंतं क्रुधितं भृशं १२ दृष्ट्वैनं निकटे क्रूरं श्वपाको मार्गरोधकं व्रतविघ्नकरं मत्वा
परां चिंतामुपागमत् १३ अल्पप्राणः श्वपाको सौ बलवान्ब्रह्मराक्षसः दुःखशोकेन संतप्तो न शक्नो
ति विचेष्टितुं १४ ततो धैर्यं समालंब्य बलात्कारत्वाहरिं प्रभुं भक्ताभयप्रदातारं तमुवाच निशाचरं
१५ ॥श्वपाक उवाच॥ कोसि त्वं भीषणाकारो विकृतो भयवर्धनः कुतो रुणत्सि मे मार्गं तत्सर्वं वद स
त्वरं १६ ॥सूत उवाच॥ एवमुक्तः श्वपाकेन क्रुधितो ब्रह्मराक्षसः उवाच परुषं वाक्यं मानुषाहार
लोलुपः १७ ॥ब्रह्मराक्षस उवाच॥ अस्मिन्नेव वने नित्यमहं वै ब्रह्मराक्षसः वनागतनरान्भुक्त्वा
विचरामि यथासुखं १८ अतीतानि नवाहानि फलमूलादिभिर्मया मद्भयात्कोपि मनुजो नात्र १२७
संचेष्टते यतः १९ अद्य मे दश रात्रिर्निराहारस्य गच्छति धात्रा निवेदितो सि त्वं मम ग्रासो जिघत्स
मी

तः २० अद्य त्वां भक्षयिष्यामि सवसामांसशोणितं परां तृप्तिं गमिष्यामि नात्र कार्या विचारणा २०
ब्रह्मरक्षोवचः श्रुत्वा श्वपाको व्रतलालसः राक्षसं वंदयामास गिरा मधुरया तदा २१ ॥श्वपाक उवाच॥
शृणु राक्षस मे वाक्यं मागतोहं त्वदंतिके धात्रा यथा त्वकाद्दिष्टमवश्यं करणं तथा २२ किंत्वहं विष्णुस
न्निधे जागरार्थं समागतः प्राप्तोसि त्वं मया मध्ये मद्व्रतभ्रंशकारकः २३ अतस्त्वामित्यहं याचे ब्रह्म
राक्षस सादरं याचितार्थप्रदा लोके महद्धाम भवंति हि २४ अत्रास्ते श्रीमहाविष्णोः प्रासादः पुण्य
वत्तरः जागरार्थमहं गच्छे प्रत्येकादशिकात्रवै २५ अद्यांतरा त्वमेवं मां भाषसे दैवचोदितः पश्यंत
द्यपि मे मित्र परोपकरणं यतः २६ परोपकरणं प्राणैः कौशिकादिमहर्षिभिः पुरा परं त्वं व्रतरक्षायां वि
ष्णुं गमिष्यति शोभनः २७ प्रसीद तन्महाविष्णुव्रतसंरक्षणाय तः अतस्त्वां प्रार्थयेहं द्वयमप्यस्तु ते
यथा २८ तत्र गत्वा व्रतं कृत्वा गानजागरणात्मकं पश्चात्तेत्वागमिष्ये जागराद्विनिवर्तितं २९ वि
ष्णुसंतोषणार्थाय व्रतमेतदनुत्तमं जागरे विनिवृत्ते मां भक्षयस्व यथासुखं ३० ॥सूत उवाच॥ श्वपा
कस्य वचः श्रुत्वा राक्षसो ति क्रुधार्दितः श्वपाकं प्रत्युवाचासौ हसन्वै च न शंकितः ३१ ॥राक्षस उवाच॥

मृषा किं भाषसे धूर्त पुनरेष्यामि तेंतिकं कोऽद्य दृष्टो मुखाद्भ्रष्टः पुनर्याति तदंतिकं ३२ श्रुतिस्मृतिपुरा
णानि रटंत्येवं पुनः पुनः प्राणवस्तुपरित्यागे कार्यनाशो भवेत् ध्रुवं ३३ तस्मात्त्वं न विमोक्ष्यामि निकृते
प॰श॰ साधुलिंगिनं भक्षयामि तवांगानि यथारुचि यथासुखं ३४ ज्ञात्वा तदा श्वपाकोऽसौ राक्षसस्येति निश्चयं
१२८ सत्ये मनः समाधाय रक्षस एतदुवाच ह ३५ ॥श्वपाक उवाच॥ नाहं सत्यात्परिभ्रष्ट इति निश्चिनु राक्षस आ
यामि च पुनर्यास्ये कृत्वा कार्यं त्वदंतिके ३६ यद्यप्यहं हि चांडालः सर्वकर्मविगर्हितः आत्मानं मानुषं देहं
केनाप्यकृतकर्मणा ३७ सत्यमूलं जगत्सर्वं सत्ये लोकाः प्रतिष्ठिताः सत्येन प्राप्यते सौख्यमेवमाहुर्मनी
षिणः ३८ सत्येन तपते सूर्यो वाति सत्येन मारुतः सत्येन प्राप्यते स्वर्गः सर्वं सत्ये प्रतिष्ठितं ३९ उदधिर्लं
घते नैव मर्यादां सत्यपालितः सत्येन ज्वलते वह्निः सत्येन पृथिवी स्थिरा ४० सत्येन प्राप्यते धर्मः सत्ये
न प्राप्यते सुखं असत्यपापिपाताले बलिः सत्यं समाश्रितः ४१ स्थितः सत्ये महाविंध्यो वर्धमानो न व
र्धते सर्वं चराचरमिदं सत्येन ध्रियते जगत् ४२ धर्मो वर्णाश्रमाणां ये वाजिमेधाद्या मखाः सत्यं च तु १२८
लितं तस्मात्सत्यमेवाभवद्गुरु ४३ एवं सत्यस्य माहात्म्यं श्रुत्वा हृष्टश्च तत्त्वतः पुनरेष्याम्यहं रक्षः स

त्ये सत्ये न संशयः ४४ तस्मान्मां मुंच रक्षस्त्वं निश्चयं कुरु चात्मनि नवप्रत्ययदार्ढ्याय पुनरन्य
कथाम्यहं ४५ ॥इति श्रीप॰ ख॰ एकादशीजागरणमाहात्म्ये [illegible] ध्यायः ॥६९॥ सूत
उवाच॥ रक्षः प्रत्ययदार्ढ्यार्थं किंचासाक्षीं च पुल्कसः पुनर्नामा विधांश्चक्रे शपथान् जागरोत्सु
कः १ ॥श्वपाक उवाच॥ ये महापापिनो लोकाः कृतघ्नानां दुरात्मनां तान् लोकान्वै गमिष्येऽहं नागमि
ष्यामि चेत्पुनः २ मिथ्यावादरतानां च परदारोपसेविनां पापैः कर्बुरलिप्येऽहं नाग॰ ३ उदक्यागा
मिनः पापं पाकभेदकरस्य हि यत्पापं तत्भवेन्मह्यं ना॰ ४ द्विजत्वं दुर्लभं प्राप्य नाधीयीत श्रुतिं द्वि
जः तस्य दोषो ममास्त्वयना॰ ५ आह्निके पिशुने चौरे घातके कृतभोजिनि यत्पापं तेन लिप्येऽहं ना
६ भोजनावसरे दीपे गते यः कुरुते भुक्तिं मम भूयादघं तस्य ना॰ ७ यो द्विभार्य उभे भार्ये समदृ
ष्ट्या न पश्यति तस्य स्यात्कलुषं मह्यं ना॰ ८ श्वपाकावतमाजीरान्यः पुष्णाति चकुक्कुटान् ममास्तु
पातकं तस्य ना॰ ९ कूष्मांडच्छेदिका नारी दीपनिर्वापकः पुमान् तयोः पापं च मे भूयान्ना॰ १० मा
तास्वसा स्नुषा कन्या नमेयमिति वै वदन् कुरुते पापदृष्टिं यः स त्वा पं मे न्य श्याभवेत ११ सः

॥सूत उवाच॥ इति तद्रूपधान् श्रुत्वा विस्मितो ब्रह्मराक्षसः उवाच मधुरं वाक्यं शीघ्रं गच्छ नमोऽस्तु ते ११
व॰श्री ततो राक्षसनिर्मुक्तः श्वपाकः कृतनिश्चयः शीघ्रं देवालयं गत्वा गायन्स त्वभिशोभितः १२ नारा
१२९ यण हरे विष्णो गोविंदेतीरयन्मुहुः नृत्यगायनसंसक्तः स तां रात्रिमतिवाहयत् १४ अथ प्रभाते
समये समाप्ते जागरे हरेः गमनाय मतिं चक्रे राक्षसाभ्यासमंजसा १५ ततो ध्वनि ददर्शासावेजमा
नशिरोधरं श्वसंतं यष्टिकायुक्तं च द्वाराग्रे ऽमयतः [illegible] तं दृष्ट्वा स तं मार्गे विनयानतकंधरः पु
नः पुनर्नमस्कृत्य श्वपाकः स्थितः स्थिते [illegible] ब्राह्मणस्त्वनुवाचायं कोऽसि शीघ्रं क गच्छसि किं ते का
र्यं श्वपाक त्वं किं वा मृगयसे वने [illegible] इति तस्य वचः श्रुत्वा श्वपाकः सत्यवाक् तदा सर्वं निवेदयामास
स वृत्तं द्विजपुंगवे [illegible] ॥श्वपाक उवाच॥ चांडालोऽहं द्विजश्रेष्ठ संप्राप्तोऽस्मि सन्मतिः एकादश्यामनना
हारो जागरार्थं विहगम [illegible] विपिने ... तो दूरे तिष्ठति ब्रह्मराक्षसः समयो मे कृतस्तेन स्वश
रीरार्पणे किल [illegible] तत्राहं मे ... गच्छामि तत्सुधा ... तथैव द्विज यतस्त्यति गोविंदः अतिशानार्थपा १२९
लनात् [illegible] गमिष्यत्यन्यथा नाशं कृतं पुण्यमार्जितं अतोऽहं तत्र गच्छामि देसा ... बुद्धिमन्मम

[illegible] श्वपाकस्य वचः श्रुत्वा भगवान् हरूपधृक् निश्चये दृढं तं तस्य विज्ञातं पुनरब्रवीत् [illegible]
॥ब्राह्मण उवाच॥ जीवतो धर्मसिद्धिः स्यादर्थसिद्धिश्च जीवतः जीवतः कामसिद्धिः स्याज्जीवन्भद्रा
णि पश्यति [illegible] यत्रोऽधर्मश्च मा ... संपदो विपदोऽपि वा सुखं वा यदि वा दुःखं घटेत ... [illegible]
तत्र गच्छ जीव चांडाल नात्र गंतुं त्वमर्हसि यत्रासौ राक्षसः पापः पिशिताशी बुभुक्षितः २० स्वस्थावं
त्वं द्रुतं गत्वा धर्मसंचयमाचर सत्यलोपकृतं पापं न स्पृशेत्वां मदाज्ञया [illegible] गोविप्रप्राणरक्षार्थं पू
ते स्वप्राणसंकटे स्त्रियां शठे विवाहे च नानृतं दोषमावहेत् [illegible] इत्यं तद्वाचमाकर्ण्य श्वपाकोऽसौ दृढ
व्रतः उवाच मधुरं वाक्यं मनसैव कृतनिश्चयः [illegible] ॥श्वपाक उवाच॥ नाहमेवं करिष्यामि यन्मां त्वं परि
भाषसे न चाहं नाशये सत्यमेतन्मे निश्चितं व्रतं [illegible] सत्यमेव परो धर्मः सत्यमेव परं तपः सत्यमेव प
रं दानं सत्यमेव परं व्रतं [illegible] नान्यं धर्मं परं प्राहुः स्वसत्यपरिपालनात् अतो बुद्धिं विचार्यैवं कथ
मेवं प्रभाषसे [illegible] तारणाय दितं सत्यं पातनायानृतं तथा नाहं तस्मात्प्रलोभेन भवेयं सत्यनाशकः
२४ नाहं श्वपाक रिष्यामि गच्छ तात नमोऽस्तु ते निश्चयं मम जानीहि यास्ये राक्षससंनिधिं [illegible]

वमुक्त्वा वचः शीघ्रं श्वपाकः सत्यनोदितः । आगमत्तत्र वेगेन यत्रासौ राक्षसाधमः ॥ २६ ॥ सोऽ
प॰श्री॰ प्यतिक्रममालक्ष्य विचिन्त्य क्षिपिनेश्वलः । ब्रह्मा मानुदिशं क्रुद्धः आरागतो घातयितासौ ॥ २७ ॥ तथा
विधं च तं दृष्ट्वा भ्रमं तं निकषात्मजं । तत्सदेशं समागम्य प्रांजलिस्तमभाषत ॥ २८ ॥ पुल्कस उवाच ॥
१२० आगतोहं महाभाग कृत्वा जागरमुत्तमं । स्वीयं व्रतं समाप्याशु सत्यनैगडयंत्रितः ॥ २९ ॥ एहोहि मम
मगात्राणि भक्षयस्व यथेच्छया । यथा स्याद्दत्तलोहत्वीय यथा च तव रोचते ॥ ३० ॥ एवं श्वपाकवचनं श्रु
त्वासौ ब्रह्मराक्षसः । उवाच हर्षितस्वांतः श्वपाकं सत्यपालनात् ॥ ३१ ॥ इति श्रीप॰ उ॰ एकादशीमाहात्म्ये
निरूपणे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ राक्षस उवाच ॥ परं तुष्टोस्म्यहं वत्स तव सत्यप्रपालनात्
चांडालस्यानभिज्ञस्य यस्यैते मतिरीदृशी ॥ १ ॥ तवदाऽपि मरहं हत्वा वसन्नो नास्ति संशयः । तव प्राणा
न्मया मुक्ता गच्छ गेहं यथासुखं ॥ २ ॥ परं तु त्वामहं याचे यत्किंचिद्देहि तन्मम । त्वत्प्राणरक्षणं तेन भ
विष्यति न चान्यथा ॥ ३ ॥ जागरे गायनं कृत्वं कृतं यद्धरिमंदिरे । तत्पुण्यं देहि मे शीघ्रं यदि जीवितु १२॰
मिच्छसि ॥ ४ ॥ राक्षसी गिरमाकर्ण्य मरणादप्यनंतरं । श्वपाकः प्राणरक्षायै मचालदृढव्रतः ॥ ५ ॥

समागतो महाविघ्नो निवर्तेत कथं मम । विचार्यैवं श्वपाको सावुवाच ब्रह्मराक्षसं ॥ ६ ॥ श्वपाक उवाच ॥
त्वयं यत् भाषितं पूर्वं तत्सत्यं तु मया कृतं । तस्माद्भक्षय मे देहं न दास्ये गीतजं फलं ॥ ७ ॥ एवमुक्तः श्वपा
केन राक्षसः पुनरब्रवीत् । यामद्वयोद्भवं पुण्यं श्वपाक वितराशु मे ॥ ८ ॥ एवं रक्षोगिरं श्रुत्वा श्वपाकः
पुनरब्रवीत् । न दास्यामि तदप्यत्र भक्षयस्व यथासुखं ॥ ९ ॥ एवं निराकृतस्तेन राक्षसः पुनरभ्यवा
न् । एकयामोद्भवं पुण्यं देहि त्वं मम सुव्रत ॥ १० ॥ श्वपाकस्तस्य निर्बंधं श्रुत्वा तमवदत्पुनः । भक्षयस्वेत्य
ति ज्ञातं गीतपुण्यं किमिच्छसि ॥ ११ ॥ कोणपस्तं पुनः प्राह गीतैकस्याथवं फलं । देहि शीघ्रमनेनाशुत्वा
त्मानं तारयाम्यहं ॥ १२ ॥ इत्युक्तस्तदा ग्रहं ज्ञात्वा श्वपाको भगवत्प्रियः । स्वांते विचारयामास बलाबलवि
धिं तदा ॥ १३ ॥ अहो कष्टं महत्प्राप्तं किं कार्यमधुना मया । सबलं दुर्बलं किं वा ज्ञात्वा कुर्वे यथाविधि ॥ १४ ॥
सर्वं तपो दया दानं स्वाध्याययजनादिकं । परोपकारपुण्यस्य कलां नार्हति षोडशीं ॥ १५ ॥ परोपकारि
मिदं ज्ञात्वा अपि प्राणान्नृभिः पुरा । गीतदानेन तत्स्वार्थी किं न स्वयं मया पुनः ॥ १६ ॥ परोपकारः कर्तव्यो
धर्मैः प्राणैरथापि वा । इत्याश्रावि मया भूयो नो दास्ये गीतजं फलं ॥ १७ ॥ इत्थं निश्चित्य मनसि श्वपाकः

पुण्यमानसः धर्मदानेमलिंकृत्वाजगाद्ब्रह्मराक्षसं १८ ॥श्वपाकउवाच॥ कस्त्वंसर्वंकिमाचारः
प.श्री. किंजन्माकिंक्रियायुतः राक्षसत्वंत्वयाप्राप्तंकेनदुष्कृतकर्मणा १९ तत्सर्वंमेसमाचक्ष्वकृत्वा
१२१ राक्षसचेष्टितं यथोचितंकरिष्येहंरात्रिंचरततःपरं २० तद्वागमृतमापीयपरानंदमुपागतः
प्रणम्यदंडवद्भूमावस्मपःप्रत्युवाचतं २१ ॥राक्षसउवाच॥ जन्मनात्वंश्वपाकोसिगुणैर्विप्राधिको
मतः यस्यतेनिश्चलाभक्तिर्माधवेभक्तवत्सले २२ धर्मसारंविचिंत्याशुकरुहदीनस्यमोक्षणं दु
ष्टेसाधुःसर्वेसाधुसाधोसाधोनेसाधुता २३ बहुजन्मार्जितैःपुण्यैर्घटतेसंगतिःसतां तदहंतव
तेमानंचचेष्टितंशृणुमेखिलं २४ प्राग्भवेसोमशर्माहंब्राह्मणोग्रामयाजकः कर्मकांडानभिज्ञश्चा
निष्णातोयज्ञकर्मणि २५ मंत्रतंत्रक्रियाहीनंकारयित्वाध्वरादिकं कुमार्गेणैवबहुलंद्रव्यंसं
चितवानहं २६ स्नानसंध्यादिनित्यानांकृतोलोपःस्वकर्मणां काम्यनैमित्तिकानांतुकर्मणांका
कथातदा २७ इत्यादिकर्मभिर्दुष्टैर्ब्राह्मण्यंभस्मसादभूत् एवंपूर्वभवेनाम्नाब्राह्मणोहंनकर्म १२१
णा २८ ततःकालेनतत्राहंपंचत्वंसमुपागतः सोध्वरैहिककर्माणि वैदिकंनाभवन्मम २९

कर्मणातेनभूत्वाहंराक्षसोस्मिन्घनेवने पुनश्चपातकंकुर्वन्नानाजीवविघातनैः ३० असं
भावितनिस्तारंमग्नंतंपातकार्णवे त्वंमांगीतप्रभावेननिस्तारयितुमर्हसि ३१ तदहंतंसकलंश्रु
त्वाकृपामृतपरिप्लुतः तमुवाचवचोरम्यंस्मरन्धर्मंसनातनं ३२ ॥चांडालउवाच॥ माचिंतांकुरु
दुर्बुद्धेनिस्तारस्तउपस्थितः विहायप्रभौयतस्त्वंहि फलमिच्छसिगीतजं ३३ गीतवानस्मियच्चायं
स्वरमेकमनुत्तमं फलेनतस्यभद्रत्वंराक्षसत्वात्प्रमोक्ष्यसे ३४ इत्युक्त्वाजलमादायस्मरन्तंपुण्य
मुत्तमं स्मृत्वाविष्णुपदंभोजं प्रददौब्रह्मराक्षसे ३५ सोपितत्पुण्यमादायतत्क्षणेराक्षसीतनुं त्य
क्त्वारूपंपरंलेभेद्युतिद्योतितदिङ्मुखं ३६ दिव्यदेहस्ततोभूत्वासोमशर्मामहर्षयः परमानंदमा
पन्नःसक्षाश्वपचंतदा ३७ धन्योसिभद्रकल्याणमत्प्रसादाद्वासुरिह यतस्त्वयानघगति
कस्मात्तोहंदयावता ३८ श्वपाकस्यापिसद्दृष्टंदृष्ट्वाभक्तिमवलोकयसः भगवानपिसंप्रीतः
प्रत्यक्षोभूत्तयोस्तदा ३९ स्निग्धप्रावृड्घनश्यामःकंजपत्रायतेक्षणः पीतांबरश्चतुर्बाहुः
शंखचक्रगदाधरः ४० विमानविटमारूह्य तावुपारोप्यसत्वरं स्वसारूप्यधरौकृत्वानिन्येवै

सोमशर्मोवाच४

कंठमद्भुतं ॥ ३३ ॥ एवं जागरमाहात्म्यमेकादश्यां निरूपितं अतोत्र व्रतिभिः कार्यं भक्त्या जागरणं
प॰पु॰ निशि ॥ ३४ ॥ एकादश्यामुपोष्यैव जागरं यस्तु कारयेत् स तारयति दुःखाब्धिं श्वपाकोऽपि हि संशयः ॥ ३
१२२ ५ तस्मात्प्रयत्नतः कुर्याद्गीतवादित्रनर्तनैः युक्तं जागरणं रात्रौ सम्यक्कृष्णसंनिधौ ॥ ३६ ॥ यः प्र
यागे महाभागो माघमासे सिते दले एकादश्यामनाहारो माधवं पूज्य भक्तितः ॥ ३७ ॥ जागरं कुरुते रा
त्रौ गीतनृत्यादिसंयुतं सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ॥ ३८ ॥ उद्यापनं यथाशक्त्या एकाद
श्याः करोति यः अन्यथा व्रतलोपोऽस्य पापं तस्माद्दिवं व्रजेत् ॥ ३९ ॥ एवं नित्यं च काम्यं च प्रोक्तमेकाद
शीव्रतं युष्माभ्यः सविधानं मे किमन्यत्कथयामि वः ॥ ४० ॥ इति श्रीप॰पु॰ एकादशीव्रतनिरूपणं नाम
सप्ततितमोऽध्यायः ॥ ७० ॥ ऋषय ऊचुः ॥ महिमा युष्मतां प्रोक्तो भवता परमाद्भुतः नित्यकाम्यविधिः सर्व
स्तद्वत्वनि - नोदिता ॥ १ ॥ [illegible] साकथं सूतक दावैकेन हेतुना कृतः साति पवित्राभूत्सर्वपाप
प्रणाशिनी ॥ २ ॥ तद्वृत्तान्तं समाख्याहि सर्वश्रेयो यतो भवेत् सर्वदुःखौघशमनी पुत्रपौत्रविवर्धिनी १२२
३ ॥ सूत उवाच ॥ मुरनामा महादैत्यः सर्वदेवोपतापकः युयुधे निर्जरैः सर्वैर्बलवान्रणदुर्मदः ॥ ४

तदा पराजिताः सर्वे ते न देवाः सवासवाः ब्रह्मलोकं ततो गत्वा ब्रह्माणमिदमब्रुवन् ॥ ५ ॥ देवा ऊचुः ॥
ब्रह्मन्पराजिताः सर्वे मुरेण बलिना वयं शरणं त्वां प्रपन्नाः स्म तदुपायं वदस्व नः ॥ ६ ॥ ब्रह्मोवाच ॥
अहो सुरगणा यूयं शृणुध्वं वचनं मम बिभेमि तं महादैत्यं ब्रह्मलोकस्थितोप्यहं ॥ ७ ॥ अतो मे नास्ति
सामर्थ्यं बलिनस्तस्य नाशने अबले धूर्जटिं यात स उपायं विधास्यति ॥ ८ ॥ एवं निराकृतास्तेन निरा
शा देवतागणाः कैलासं शरणं जग्मुः शंकरलोकशंकरं गत्वा प्रणम्य विधिवत्सर्वे प्रांजलयः सु
राः दुःखं निवेदयामासुस्तस्मै मुरसमुद्भवं ॥ ९ ॥ देवा ऊचुः ॥ सदाशिव वयं सर्वे भवदीयाः पराजिताः
मुरेण बलिना कापि स्थानं नैव लभामहे ॥ १० ॥ अतस्त्वां शरणं प्राप्ताः प्रपन्नार्तिहरं गुरुं तथा कुरु दया
सिंधो यथा नश्येत कंटकः ॥ ११ ॥ शंकर उवाच ॥ भो देवाः किं मया कार्यं विष्णुना प्रभविष्णुना प्रसन्ने
न वरो दत्तस्तस्मै दुष्टाय दुर्जरः स देवेभ्यो दानवेभ्यश्च मनुष्येभ्यस्तथैव च सर्वेभ्यः पुरुषेभ्यस्तेन
न नाशो भविष्यति ॥ १२ ॥ अतः कस्यापि सामर्थ्यं नास्ति तस्य विनाशने अतः सर्वे वयं विष्णुं प्रार्थयि
ष्यामहे न सा ॥ १३ ॥ इत्युक्त्वा शंकरो ब्रह्मा सर्वे देवाः सवासवाः गत्वा क्षीराब्धिशयनं महाविष्णुमत

प्र.श. ष्टुवुः १६ ॥ देवा ऊचुः ॥ नमस्ते पुंडरीकाक्ष भक्तसंकटनाशन शरणं त्वां प्रपन्नाः स्मो मुरदैत्यपराजि-
ताः १७ भवद्भाद्भवरो दुष्टो बाधते स्मानहर्निशं तद्धत्वास्मान्यथा भूयो भजिष्यामः स्वलोकतां
१३३ १८ ॥ सूत उवाच ॥ इति तेषां वचो दीनं श्रुत्वानंतासनो हरिः जगाद तान्महामायो मेघगंभीरया गिरा १९
॥ श्रीविष्णुरुवाच ॥ माभैष्ट सकला देवा नाशयामि मुरासुरं इत्युक्त्वा खगमारुह्य गदापाणिस्तमन्वगात्
२० तन्निर्दिष्टे दिशि ता जग्मुः सर्वे देवगणा अपि ब्रह्मा महेश्वरश्चापि स्वं स्वं स्थानं प्रजग्मतुः २१ इति देवोद्य-
मं श्रुत्वा मुरोपि स्वबलावृतः योद्धुमभ्याययौ शीघ्रं सन्नद्धो रणदुर्मदः २२ ततो देवासुरं युद्धं तत्रभूल्लों-
लोमहर्षणं बभूव शस्त्रसंपातैर्दशरात्रमहर्निशं २३ ततो वीर्यप्रभावेन मुरेणापीडिताः सुराः पला-
यनपराः सर्वे भेजुर्दश दिशो बलात् २४ एवं पलायितान्वीक्ष्य देवान्विष्णुः स्वयं तदा युयुधे बलिना
तेन शस्त्रास्त्रै रणकोविदः २५ पराजयं न लेभेसौ दैत्यराजो यदा तदा श्रांतस्तं स्ववरं स्मृत्वा स्वयं निवृ- १३३
ते रणात् २६ ततः सौ भैरवीं गत्वा गुहां द्वादशयोजनां प्रविश्यांतः सुखं तत्र सुष्वाप जनार्दनः २७
पृष्ठतः सोप्यगाद्दैत्यो दृष्ट्वा हरिमरिं ततः प्रविवेश गुहामध्ये एकाकी युद्धकामुकः २८ तत्र दृष्ट्वा महावि-

MEMORIAL

ष्णुं प्रसुप्तं प्रहसन्मुरः उवाच वचनं हास्यं जयप्राप्तमदोद्धतः २९ ॥ मुर उवाच ॥ पलायनं कथं योग्यं सं-
ग्रामाद्धि निवर्तिनः गुहाप्रवेशस्तत्रापि शयनं भीतभीतवत् ३० एवं विकत्थमानेस्मिन्विष्णुनिश्वासतः
परा ऽऽस्याच्छक्तिः समुद्भूता युयुधे चारिणा समं ३१ तया पराजिता दैत्याः सर्वे दानवपुंगवाः निर्जितश्च
महादैत्यः सर्वसैन्यसमन्वितः ३२ क्षणेन तद्बलं सर्वं नाशयित्वा पुनः स्वयं गुहामागत्य सा विष्णोस्तस्थौ
प्रांजलिरग्रतः ३३ प्रतिबुद्धस्ततो विष्णुर्नापश्यदसुरं पुरः तामपश्यत्स्वरूपं दिव्यां प्रांजलिः पुरतः स्थि-
तां ३४ तामुवाच ततो भगवान्कासि त्वं कंजलोचने मुरनामासुरः क्वास्ते यो युध्यत मया सह ३५ एवमुक्ता
विनिष्क्रम्य गुहाया ददर्श बहिः सनाथमासुरं सैन्यं पतितं तद्रणाजिरे ३६ पतितं दानवं दृष्ट्वा स देवोती-
व विस्मितः केनासौ पातितो दैत्यः कस्य कर्म न विद्महे ३७ न देवो न च गंधर्वो येनासौ दानवो हतः वि-
स्मयो मे महाञ्जातः कस्येदं कर्म दुष्करं ३८ श्रीविष्णोर्वचनं श्रुत्वा प्राह सा कमलेक्षणा मयायं निह-
तो दैत्यस्त्वत्कृते विस्मयोत्र कः ३९ तच्छ्रुत्वातीवसंहृष्टो हृष्टस्तां प्रत्यभाषत का वा कस्यासि शक्तिस्त्वं स-
र्वमेव वदस्व तत् ४० ॥ शक्तिरुवाच ॥ त्वयि सुप्ते जगन्नाथ स दैत्योत्र समागतः घातुकं शक्तिपाणिं तं मया

दृष्ट्वा निपातितः ॥ तव चक्रेण तत्सैन्यं मया सर्वं निपातितं । आज्ञापयसि यच्चान्यत् तत्करिष्यामि स
प॰ पु॰ र्वथा ॥ श्रीविष्णुरुवाच ॥ तव रूपेण दत्तासि ते पुरुषा वध्यता मया । तद्धा कपालनार्थे वाहं च तस्मा
११४ त्पलायितः ॥ दशरात्रमहोरात्रं कृतं युद्धं मयामुना । निहतो यं महादैत्य त्व [illegible]
एकादशीति नाम्ना त्वं प्रथामिष्यसि पावनि । मत्तः कंचन्महाभागे वरं वरय कांक्षितं ॥ शक्तिरुवाच ॥
यदि तुष्टोसि भगवन् वरमेकं प्रयच्छ मे । तिथिरेकादशी तेहं वल्लभा स्यां तवाच्युत ॥ सर्वपापहराय
करी ब्रह्महत्यादिनाशिनी । सर्वतीर्थव्रतश्रेष्ठा स्वर्गमोक्षप्रदायिनी ॥ मद्भक्तये करिष्यंति नित्यं का
म्यं च मानवाः । सर्वपापविनिर्मुक्ताः प्रयांतु तव सन्निधिं ॥ इति तद्वचनं श्रुत्वा प्रीतो विष्णुरुवाच तां
यत्त्वमिच्छसि कल्याणि भविष्यति न तो धिकं ॥ इति दत्वा वरं तस्यै देवर्षिगणसंस्तुतः । देवकार्यं सम
साप्य वैकुंठभवनं ययौ ॥ एकादशीसमुत्पत्तिरेवमुक्ता महर्षयः । शृणुयाच्छ्रावयेद्यस्तु सर्वपापैः प्र ११४
मुच्यते ॥ एकादशीव्रतमिदं सभोपांगं निरूपितं । मद्भक्त्या श्रीगुरुणा प्रोक्तं किमन्यत् श्रवदामि वः ५२
॥ इति श्रीप॰ प्र॰ एकादश्युत्पत्तिनिरूपणं नाम एकसप्ततितमोध्यायः ॥ ७१ ॥ ऋषय ऊचुः ॥ स्नानं दानं जप

पो होमो यद्व्रतं तपांसि च । अनंतफलदं सर्वं प्रयागे भवतोदितं ॥ ज्ञानतो ज्ञानतो वापि यत्किंचि
त्सुकृतं कृतं । अक्षय्यं जायते सर्वं माधवस्य प्रसादतः ॥ प्रयागमहिमं दिव्यं ते त्वं महत्वं ख्यातं तत्र भूमिका अ
क्षय्यो हि वटो यत्र किं नु तत्रातिरूपं भवेत् ॥ अक्षय्यवटमाहात्म्यं स्वरूपं प्रमाणे फलं । सर्वं वद सुनि
श्चित्य तत्र श्रद्धा यते मनः ॥ सूत उवाच ॥ विष्णुना ब्रह्मपुत्रेभ्यो यत्प्रोक्तं मुनिपुंगवाः । तत्सर्वं वर्णयिष्ये
हं वटमाहात्म्यमुत्तमं ॥ कदाचिद्ब्रह्मणः पुत्राश्चत्वारः सनकादयः । गत्वा वैकुंठभवने विष्णुदर्शन
कांक्षिणः ॥ भगवानपि तान्दृष्ट्वा स्वागतीकृत्य भक्तितः । उपवेश्यासने श्रेष्ठे तानुवाच मधुरं वचः ॥
अपूर्वं कथ्यतां विप्राः किंचिद्ब्रह्मांडमंडपे । यातायातेषु यच्चित्रं दृष्टं मे भवतादिभिः ॥ सनकादय ऊचुः ॥
वर्तते सकलाश्चर्यं त्वय्याश्चर्यमये विभो । तथापि दृष्टं खिलाश्चर्यमस्माभिर्दृष्टमेव तत् ॥ अथाप्येकं म
हाश्चर्यं प्रयागे दृष्टमप्यवै । एको महान्वटो वृक्षः सर्वाश्चर्यमयो हि सः ॥ पंचयोजनविस्तारः शातव
त्सो महाद्रुमः । मूले न दृश्यते तस्य सप्तपातालगाजयः ॥ पत्राणि स्वकावर्णानि फलानि मधुराणि
च । वैदूर्यसंनिभा छाया उपर्यंतो न विद्यते ॥ तन्मूले कोपि पुरुषस्तेजःपुंजान्वितो महान् । दृश्यते ऽ

भुजः स्रग्वी श्यामः पीतांबरावृतः ॥ ३४ ॥ तत्र दृष्ट्वा महदाश्चर्यं श्रमं तो वयमागताः त्वत्सकाशमिदानीं वै
प्र॰ शा॰ तत्सर्वं कथयाशु नः ॥ ३५ ॥ श्रीभग॰ ॥ नं॰ वा॰ ॥ भो भो ब्रह्मसुता यूयं शृणुध्वं तत्प्रणिधानतः तस्य क्षेत्रस्य च
१२५ ह्नस्य स्वरूपं पुरुषस्य च ॥ ३६ ॥ प्रयागं वै स्थलं वेदा तत्रैवैकं ह्यादधिकं मम कृतो लक्ष्यवटस्तत्र मदाधारो विराज
ते ॥ ३७ ॥ मूलेयः पुरुषो दृष्टः सोहं मलक्ष्यमाधवः वटमाधवनामापि मूलमाधव इत्यपि ॥ ३८ ॥ एवं त्रिनामा
तत्राहं वसाम्यक्षय्यपादपे ब्रह्मादिभिः सुरैः सर्वैः सहितस्तीर्थनायके ॥ ३९ ॥ सर्वविघ्नविनाशार्थं भक्तानां
कार्यसिद्धये दिग्विदिक्स्वरूपेण चाष्टनामा वसाम्यहं ॥ ४० ॥ शंखचक्रगदापद्मैर्नानतविंदुमनोहराः श्र
िमाधव इत्याद्यैर्मन्नामानि निबोधत ॥ ४१ ॥ लोकसंहररूपेण भक्तसंकटनाशने सर्वत्र सर्वदा तिष्ठ
याकार्यं भ्रमन्नहं ॥ ४२ ॥ वेणीमाधवनामाहं गंगायमुनसंगमे सुखो वसामि भक्तानां धर्मकामार्थमोक्ष
दः ॥ ४३ ॥ सर्वरूपाणि संहृत्य बालरूपधरस्ततः ब्रह्मांडमुदरे कृत्वा शयेते तस्य पादपे ॥ ४४ ॥ तस्याहं कल्पवृ
क्षस्य स्वरूपं वेद्मि नापरः प्रपंचबीजम् तस्य तद्वः सर्वं निरूपितं ॥ ४५ ॥ सूत उवाच ॥ एवं प्रयागतीर्थस्य माध
वस्य वटस्य च माहात्म्यं सकलं श्रुत्वा नत्वा ब्रह्मसुता गताः ॥ ४६ ॥ तस्मादेवंविधो वृक्षो नास्ति ब्रह्मांडगोलके ॥ ४७ ॥

तीर्थं यत्र यं देवा मनुष्याणां तु का कथा ॥ ४८ ॥ तस्मान्मुनिवरा यूयमेनं पूजयताक्षयं ये न्येपि पूजयिष्यंति
प्राप्स्यंते ते मनोगतं ॥ ४९ ॥ यात्रार्थमागता ये वै नरा नार्यो मलाशयाः संपूज्य प्रार्थयंत्येते लभंते फलमक्षयं
॥ ५० ॥ सृष्टिकर्तापि यद्ब्रह्मा न लेभे सृष्टिसाधनं तदा लक्ष्यवटं चैनं पूजयामास कामदं ॥ ५१ ॥ ततो दर्या सृष्टि
सृष्टिं लेभे ब्रह्मा द्विजोत्तमाः सृष्टिं चकार सोद्यापि अंडजादि चतुर्विधां ॥ ५२ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा नार्यो
ह्यसत्तमाः पूजनादस्य संसिद्धिं यास्यंत्यत्र न संशयः ॥ ५३ ॥ पुत्रपौत्रप्रपौत्रैश्च कुले वृद्धिः प्रजायते सौभाग्यं
लभते नारी पूजनाज्जन्मजन्मनि ॥ ५४ ॥ मृतवंध्या मृगवंध्या काकवंध्या च या बला कन्यावंध्या च सत्पु
त्रं प्राप्नोत्यस्य प्रपूजनात् ॥ ५५ ॥ या नष्टा न भाषते कामं सा सर्वान्स्प्रददात्यसौ संतानवर्धनश्चापि सर्वसंप
त्करोपि च ॥ ५६ ॥ संहरेतेवै पुमानायुः संहृत्य भुवनत्रयं पादांगुष्ठं करे धृत्वा ह्यपि पन्नालसन्बालकः ॥ ५७ ॥ तस्य
रूपं प्रवक्ष्यामि गुणत्रयमयं वपुः तं कल्पवृक्षमित्याहुरपरे वेदसंज्ञकं ॥ ५८ ॥ एवं केचिदित्याहुर्मायावृ
क्षमथापरे प्रधानपुरुषं केचित्केचित्संसृतिकारणं ॥ ५९ ॥ विश्वेश्वरश्च त्रिशूलाग्रे काशीमारोप्य संवरं तिष्ठ
ति प्रलये यस्य मूले नत्वस्य हर्षितः ॥ ६० ॥ तस्मिन्काले वटं सर्वे प्रार्थयंती ममव्ययं पूजयंति नमस्यंति गृणंति

चतुरः स्थिताः ॥ वटस्य प्रणिपातेन सर्वदेवप्रियो भवेत् वटस्य ध्यानमात्रेण सर्वे धाता न संशयः
प्र·मा· ॥ गंगायमुनयोर्मध्ये यावत्पंचकूलदर्शनं तावत्क्षेत्रं वटस्यास्ति तद्वयमुदाहृतं ॥ नमस्ते वटराज
१२६ य ब्रह्मविष्णुशिवात्मने सप्तपातालसंस्थाय विचित्रफलदायिने ॥ नमो भेषजरूपाय मायापापतये
नमः माधवस्य जलक्रीडालोलपल्लवकारिणे ॥ प्रपंचबीजभूताय विचित्रफलदाय च नमस्तुभ्यं नम
स्तुभ्यं नमस्तुभ्यं नमो नमः ॥ एवं यः स्तौति तं भक्त्या नारी वा पुरुषोपि वा भुक्त्वेह सकलान्भोगान्परत्र सुख
मश्नुते ॥ आयुरारोग्यसौभाग्यसंपत्संततिकाम्यया या नारी वटसावित्रीव्रतमत्र करिष्यति ॥ गृहीत
व्रतसिध्यर्थमुद्यापनमथापि वा यथाशक्ति यथावित्तं सा तत्फलमवाप्स्यति ॥ एवं वो वटमाहात्म्यं मया
प्रोक्तं मुनीश्वराः हरिणा सनकादिभ्यः प्रोक्तं सर्वफलप्रदं ॥ अक्षय्यवटमाहात्म्यं बहुवर्षशतैरपि वक्तुं
को वा समर्थो विस्मयोक्तं कृपया गुरोः ॥ इति श्री प· प्र· अक्षय्यवटमाहात्म्यनिरूपणं नाम द्विसप्ततमो
ध्यायः ॥ ७२ ॥ ऋषय ऊचुः ॥ ये त्वयाभिहिताः सूत माधवा बहुनामकाः संक्षेपेणाधुना तेषां वर्णनं विस्तरा
त्कुरु ॥ सूत उवाच ॥ वटस्य दक्षिणे भागे देवर्षिगणसेविते सर्वसिद्धिकरं नृणां वेणीमाधवपीठमुत्तमं ॥ मूल

माधवनामासौ तत्र तिष्ठति माधवः अक्षय्यमाधवश्चैव रणवटाधो वटमाधवः ॥ स वटस्यास्य पीठस्य
माधवस्य प्रसादतः प्रलयेपि लयो नास्ति शौनकाद्या महर्षयः ॥ सर्वाण्यपि यानि पीठानि शास्त्रे सौराष्ट्रि
कानि च गाणपत्यानि शैवानि तान्यत्रैव वसंति हि ॥ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणं यत्
किंचित्क्रियते कर्म तदक्षयमुदाहृतं ॥ मूलटंकेश्वरस्तेषामन्वहं पूजनं मुदा कृत्वा प्रार्थयते भक्त्या वेद
सूक्तैश्च धूर्जटिः ॥ नानादेशागता ये च प्रयागं यांति यात्रिकाः एतेषां पूजनात्तेषां पूर्णं यात्राफलं भवे
त् ॥ पत्रं पुष्पं फलं तोयं यो भक्त्या प्रयच्छति आदरेणाय दरिद्रोपि तस्यानंतो रणः समं ॥ अथ प्रयागमा
धवं वक्ष्ये इंद्रस्योपवनांतिके क्षेत्रस्य पूर्वदिग्भागे वर्तते शंखमाधवः ॥ शंखधारी ब्रह्मचारी सर्वसिद्धि
निषेवितः मायाविषविदारी च मायानटनटेश्वरः ॥ मायापाशविनाशी च मायाकार्यविवर्जितः स्थितः माया
गुणविहारी च मायया धृतविग्रहः ॥ शंखनादेन महता जीवमायां विदारयन् भाति विश्वं स विश्वेशो
विश्वरूपी जनार्दनः ॥ प्रलये सर्वभूतानां संत्राता भक्तवत्सलः क्षेत्रं शंखस्य तोयेन वेष्टयित्वा समंततः ॥
प्रयागं सर्वदेवानामधिष्ठानं मुनीश्वराः सर्वोपद्रवजातेभ्यः क्षेत्रं रक्षति यः सदा ॥ तं शंखमाधवं दृष्ट्वा

सर्वोपद्रवनाशनं लभते सर्वदा सोऽयं यत्र कुत्रापि संस्थितः ॥ बाल्यादारभ्य तत्पापं वाङ्मनःकायसं
त्र. श. चितं शंखमाधवनाम्नात् तत्सर्वं याति संक्षयं ॥ माघमासेऽथ वैशाखे शंखमाधवदर्शनं पूजनं येऽक
१२७ र्वंति तेषां पुण्यमनंतकं ॥ नानापुष्पैः सुगंधैश्च दीपैः पूजयित्वा जयस्तवैः श्रीशंखमाधवं स्तौति सपद
स्थितये न्वहं ॥१९॥ कदाचित्तं समागत्य सद्द्योषो विजितेंद्रियः वयं किं कुर्म हे नाथ भवद्दास्योऽत्र संस्थिताः
॥ श्रीशंखमाधव उवाच ॥ भवत्यो यदि मे दास्यो वचनं कुरुताशुभे तावत्तेवा [illegible] लासे वा भवतीभिः कृ
ता मम ॥ आयास्यंति जना येऽत्र मद्भक्ता मम पूजकाः तेभ्यो यूयं प्रसीदध्वं मद्वाक्याद विशंकिताः ॥
॥ सूत उवाच ॥ अतोऽत्र ये समागत्य शंखमाधवमर्चयेत् अप्सिमायाः प्रसीदंति सिद्धयस्तस्य निश्चितं ॥
देवस्याग्नेयदिग्भागे वह्न्याश्रमसमीपतः चतुर्भुजश्चक्रधारी वर्तते चक्रमाधवः ॥ यागे वसतो
लोकान् स्वभक्तांश्च विशेषतः चक्रेण सकलापद्भ्यः संतारयति नित्यशः ॥२१॥ देवत्रे संरक्षते नित्यं चक्रेण
त्रासयन्नघान् नानाविघ्नकरान् दुष्टान् तीर्थे निंदापरान् जनान् ॥ तत्र गत्वा नि [illegible] ये स्नात्वा संतर्प्य देव १२७
ताः माधवं पूजयंत्यद्धा ते लभंते परां गतिं ॥२२॥ अभिषेकं विधिवत्पूज्य माधवेश्वर माधवं सकृत्तत्र

मंत्रैश्च गृणंति प्रत्यहं द्विजाः ॥ न समीपं च ये गत्वा कुर्वंति तस्य पूजनं भक्त्या नानोपचारैश्च तेषां
तीर्थफलं ध्रुवं ॥ न [illegible] येदानं किंचित्कुर्वंति भक्तितः तेषां तत्कोटिगुणितं जायते देवगौरवात्
॥ कदाचिद्दापु [illegible] सेवितं चक्रमाधवं चतुर्दशमहाविद्या नमस्कृत्या विजितेंद्रियाः ॥ विद्या ऊ[illegible]
कृताभिविनीता [illegible] भागावन् चक्रमाधव सेवितं [illegible] यंयाताः स्वस्वलोकान्न वांछितं ॥ भवत्सेवां
विधास्यामः कृपयानुगृहाण नः गमिष्यामो न लोकान्स्वान् अत्र नो रमते मनः ॥ तदुदीरितमाकर्ण्य
प्राहृता चक्रमाधवः भवतीभिरिहस्थेयं कार्यं च वचनं मम ॥ श्रीचक्रमाधव उवाच ॥ भवत्यः प्रथि
ता लोके महाविद्याश्चतुर्दश दर्शयंत्यतिकालेन स्वोपासकमनोरथान् ॥ तदत्र यूयं मद्वाक्यात् स्व
कालेन देहिनां अत्रागतानां भक्तानां कामपूरा भवंतु वै ॥ ये यात्रिकाः समायांति दर्शनार्थं ममा
त्र वै तेभ्यः प्रसन्ना भवत संदृष्टिस्तेन मे भवेत् ॥ इति श्रुत्वा वचो रम्यं चक्रमाधवभाषितं ओमि
त्युक्त्वा स्थितास्तत्र [illegible] ॥ सूत उवाच ॥ तस्माद्येऽत्र समायांति पूजयंति च माधवं
गृणंति च नमस्यंति तेषां ताः सकलप्रदाः ॥ [illegible] देवस्याग्नेयमार्तिके गदामाध
श्रीचक्रमाधव उवाच

वनामाख्ये हरिः पीठे तृतीयके ॥ ३० ॥ गदाघातेन दुर्दान्तां स्थित्वा विभ्रंशकारकान् । त्रासयन्नखिलान्दु
प्र॰ श्री॰ ष्टान्धर्मं कारयति स्वयं ॥ ३१ ॥ वैशाखे मासि संप्राप्ते गदामाधवं जनाः । संपूजयंति मासं वा पक्षं पक्षा
१३८ र्धमेव वा ॥ ३२ ॥ पंचैकं दिनं वापि यथासंभारविस्तरैः । माधवस्य प्रसादेन तेषां कालभयं न हि ॥ ३३ ॥
किंचिद्दत्तं कृतं जप्तं श्रीगदामाधवांतिके । जायते तदनंतं वै गदामाधवसंनिधेः ॥ ३४ ॥ श्रीगदामाधवं
नित्यं पूजासंभारविस्तरैः । यमः संपूज्य धर्मात्मा प्राणानि च यथामति ॥ ३५ ॥ कदाचिदागतास्तत्र चतुः
षष्टिकला द्विजाः । संपूज्य प्रार्थयामासुः श्रीगदामाधवं प्रभुं ॥ ३६ ॥ कला ऊचुः ॥ अमित्वा सकले लोके
परिश्रांता वयं विभो । त्वत्सकाशं वयं प्राप्ताः प्रसीदानुग्रहं कुरु ॥ ३७ ॥ उचित्वात्र यथाकामं करिष्याम स
वेरितं । नान्यत्रेतो गमिष्यामो गदामाधवशासिनः ॥ ३८ ॥ श्रीगदामाधव उवाच ॥ भवत्यो त्रैव तिष्ठंतु कु
र्वंतु च ममेप्सितं । कलयंतु कलौ कालानां भागं कलमसात् ॥ ३९ ॥ यात्रार्थं ये समायांति ह्रानि नो ह्रानि
नो जनाः । नरा वा यदि वा नार्यो मूयंते वा प्रसीदत ॥ ४० ॥ सूत उवाच ॥ श्रुत्वेत्थं भगवद्वाक्यं वाढमुक्त्वा
महर्षयः । गदामाधववाक्येन स्थितास्तत्रैव संस्थिताः ॥ ४१ ॥ तदग्रे ये जना यांति पूजयंति च माधवं । कलावं

MEMORIAL

तो भवंत्येते गदामाधवशासनात् ॥ ४२ ॥ स्वशक्त्यानेकदानानि किंचिद्वा मनसापि वा । फलपुष्पादि
कं वापि ददतामतुलं फलं ॥ ४३ ॥ मयैवं वर्णिता विप्रा माधवा बहुसुखप्रदाः । भवंतो परमप्रीत्यैव वर्णयि
ष्यामि चापरान् ॥ ४४ ॥ इति श्रीप॰ प्र॰ माधववर्णने त्रिसप्ततितमोध्यायः ॥ ७३ ॥ सूत उवाच ॥ क्षेत्रस्य नैर्ऋ
ते भागे वर्तते पद्ममाधवः । चतुर्थे वेणवे पीठे योगिनां सिद्धिदायकः ॥ १ ॥ पद्ममालानिवीतांगः पद्म
गर्भादलेक्षणः । स्थितैतदखिलं क्षेत्रं पाति सर्वभयादसौ ॥ २ ॥ श्रियायां पूज्यते नित्यं सहस्रैः पद्मकुड्म
लैः । नानोपचारैर्भूपालैः पद्मया पद्महस्तया ॥ ३ ॥ कदाचित्पद्मया भक्त्या पूजयित्वा पद्ममाधवं । प्रणम्य पु
रतः स्थित्वा बद्धांजलिरुवाच वै ॥ ४ ॥ पद्मोवाच ॥ भगवन्पद्मपत्राक्ष पुण्यश्लोक श्रीरमापते । भवान्वै
कुंठभवनं त्यक्त्वात्रैव समास्थितः ॥ ५ ॥ त्वद्विना तत्र मे वासो जायते न सुखावहः । त्वत्पादपाथोज
मर्हं सेवितुमागता ॥ ६ ॥ न त्वां त्यजामि नैकस्मादधुना वैकुंठवासिनः । इति श्रुत्वा वचनं तस्याः कृपया वदसि च
रे ॥ ७ ॥ पद्ममाधव उवाच ॥ पद्मेव सुपलाशाक्षि वैकुंठादधिकं मम । प्रयागाख्यमिदं क्षेत्रमतीयवल्ल
भं प्रिये ॥ ८ ॥ तस्माद्त्रैव मे वासो रोचते कमलालये । त्वमप्यत्रैव तिष्ठ स्वमदाराधनतत्परा ॥ ९ ॥ पीठे

स्मिन्येसमायांतिमद्भक्तायात्रिकाजनाः प्रसन्नाभवतेभ्यस्त्वंमहाक्याद्विशंकिता ११ ॥सूतउवाच॥
ग्र·श· इतिप्रियवचःश्रुत्वापद्मापद्मदलेक्षणा चकारवसतिंतत्रपीठेसंहृष्टमानसा १२ ततोगंकृतियेतत्रन
१२९ रानार्यीमलाशयाः पूजयंत्युरुचारैश्चभक्त्याश्रीपद्ममाधवं १३ सौभाग्यमतुलंलक्ष्मीपुत्रपौत्रादिसंपदः
लभंतेत्रपरांभुक्तिंपरत्रचपरांगतिं १४ स्नानदानतपोहोमजपश्राद्धादिकाःक्रियाः क्रियंतेयेकरिष्यं
तितेषांतुष्यतिमाधवः १५ निर्वृतिःश्रद्धयायुक्ताश्चाद्भिविधिपूर्वकं विधायमाधवंदेवंसंतोषयतिनि
त्यशः १६ क्षेत्रस्यपश्चिमेभागेध्योतनेनंतमाधवः पंचमेवैहत्वपीठेवरुणाख्यमसन्निधौ १७ वरुणस्तत्र
तंभक्त्यासंपूज्यविमलाशयः विचित्रैर्विविधैःस्तोत्रैःस्तुवन्नास्तेसदाचलः १८ तत्रैकदासमाजग्मुर्दे
वाःसूर्यपुरोगमाः पूजयांचक्रिरेभक्त्यानंतमाधवमंदरात् १९ संपूज्यविविधैर्द्रव्यैरानंदाश्रुकुलाकुलाः
पुलकोद्भिन्नसर्वांगास्तुष्टुवुर्जगदीश्वरं २० ॥देवाऊचुः॥ हरेसर्वजगन्नाथजगद्धेयजगन्मय जगदा
धारभूतेशहृषीकेशनमोस्तुते २१ भक्तकामप्रदानंतभक्तानामभयंकर भजनीयपदस्वामिन्कृपया १२९
नुग्रहाणनः २२ त्वामत्रागतमाज्ञायवयंसर्वेसमागताः स्थातांदेहिस्वभक्तेषुप्रसीदकरवामकिं २३

॥सूतउवाच॥ इतिदेववचःश्रुत्वाप्रसन्नोनंतमाधवः तानुवाचवचनंरम्यंमुनयःशौनकादयः २४ ॥अ
नंतमाधवउवाच॥ भवंतोत्रप्रतिष्ठंतुमांभजंतुदिवौकसः पूरयंत्वखिलान्कामान्भक्तानांममसर्वदा
२५ ॥सूतउवाच॥ इत्यानंतंवचःसर्वेनिरजराःसुखदाः तदाप्रभृत्यार्वणर्जवस्ताःस्वर्वरुणाश्रममंडले २६ तत्र
गत्वातुयेकेचित्पत्रपुष्पजलादिभिः अनंतमाधवंसंपूज्यप्राप्नुवंतिमनोगतं २७ तत्रयेब्राह्मणादिभ्योवस्
नान्नजलादिकं दास्यंतिमाधवप्रीतयेतेयास्यंतिपरांगतिं २८ अथवायव्यदिग्भागेषष्ठेवैषाद्वपीठके वा
युमंडलमाश्रित्यवर्ततेबिंदुमाधवः २९ कल्पद्रुमप्रसूनानिवायुरानीयनित्यशः बिंदुमाधवमभ्यर्च्यतेः
स्तौतिपुरतःस्थितः ३० अतोत्रबिंदुनामानंमाधवंयेर्चयंतिते कृतकृत्याःप्रजायंतेनानाजन्मसुनिश्चि
तं ३१ कदाचिदागतास्तत्रदेवब्रह्मर्षयोपुरा भरद्वाजादयःसप्तमाधवालोकनोत्सुकाः ३२ आगत्यपू
जयित्वैनंप्रणिपत्यपुरःस्थिताः ईडिरेवैदिकैःसूक्तैर्बिंदुमाधवतुष्टये ३३ तेषांस्तुतिंसमाकर्ण्यप्रसन्नो
बिंदुमाधवः अवादीन्मंजुवचनैर्मीषत्स्मितमुखांबुजः ३४ ॥बिंदुमाधवउवाच॥ किमर्थमागतायूयंक
ष्टपायाःमहर्षयः तत्स्तत्कारणंतथ्यंमाकिलंबोविधीयतां ३५ श्रुत्वातेवचनंबिंदुमाधवीयंमनोरमं प्र
दु

हृष्टाः पुनरूचुस्तं सारासारविचक्षणाः ३४ ॥ कश्यपादय ऊचुः ॥ नमस्ते पुरुषाध्यक्ष बिंदुमाधव ते नमः ३
प०श० ष्टुत्वा वयमायातास्ते विलंघ्य जगत्पते ३५ ज्ञात्वा तदाशयं प्राह पुनस्तान्बिंदुमाधवः एवं चेदत्र तिष्ठंतु वि
१५० धाय पृथगाश्रमान् ३७ आगच्छंति जना येत्र मम संदर्शनोत्सुकाः भवतः पूजयित्वा ते पश्चान्मां पूज
यंतु वै ३८ ॥ सूत उवाच ॥ अतो मुनिवरास्तत्र पूज्यादौ कश्यपादिकान् पूजयंति ततो बिंदुमाधवं यांति
ते सुखं ३९ पूजनं हवनं दानं स्वाध्यायं जपमेव वा अत्यल्पं यश्च कुर्वीत मुनिरूपा भवंति ते ४० ॥ इति श्रीप
द्म० माधववर्णने चतुःसप्ततितमोध्यायः ॥ ७४ ॥ सूत उवाच ॥ अथ क्षेत्रोत्तरे भागे कुबेराश्रमसन्निधौ सप्त
मे वैष्णवे पीठे श्रीमनोहरमाधवः १ भूषणैः स्वर्णवसनै रत्नैर्मौक्तिकदामभिः कुबेरः पूजयत्येनं श्रीम
नोहरमाधवं २ प्रत्यहं पूजयित्वैवं दंडवत्प्रणिपत्य च करोति स्तवनं तस्य प्रांजलिः पुरतः स्थितः ३
॥ कुबेर उवाच ॥ नमस्ते कामरूपाय स्वर्णाकरभूमये मनोहराय देवाय माधवाय नमो नमः ४ इ १५०
दं कंदर्पदर्पघ्नं दृष्ट्वा रूपं तव प्रभो प्रसन्नं मानसं मे भूच्छ्रीमनोहरमाधव ५ धन्योयमाश्रमो मेस्ति यत्र
सन्निहितो भवान् अहमप्यस्मि धन्यो वै सर्वदा तव दर्शनात् ६ स्तुत्वा पुनः पुनश्चैवं तं मनोहरमाधवं

प्रसन्नमानसस्तत्र वसते स्म धनाधिपः ७ तत्रैकदा सगंधर्वा उर्वश्याद्या वरांगनाः नृत्यसाधन
संपन्नास्तं द्रष्टुं समुपागताः ८ नत्वा तं पूज्य सर्वास्ता आलप्य स्वरमंडले नृत्यंतः पुरतस्तस्य नानावि
धानुसारतः ९ वीणावेणुमृदंगानां ध्वनयः संबभूविरे सप्तस्वरैर्यथाभेदैः प्रजगुस्ताः समूर्छनैः १०
सुप्रसन्नस्तदा तासां वाद्यगायननर्तनैः प्रोवाच सस्मितं वाक्यं श्रीमनोहरमाधवः ११ ॥ श्रीमनोहरमाध
व उवाच ॥ वाद्येन भवतीनां मे परानंदोद्य जायते यदर्थमागता यूयं याचयध्वं मनोगतं १२ ॥ अप्सरस ऊचुः
त्वां द्रष्टुमागता वयमिंद्रलोकाद्रमापते श्रुत्वा च क्षेत्रमाहात्म्यमत्र त्वां सेवयामहे १३ ॥ सूत उवाच ॥ इति
तद्वाचमाकर्ण्य श्रीमनोहरमाधवः तासूचे वचनं कांतं स्मिताधरपल्लवः १४ ॥ श्रीमनोहरमाधव उवाच ॥
सुखमत्रैव तिष्ठंतु भवत्यः सपरिच्छदाः नाट्यं नित्यं प्रकुर्वंतु पूजनावसरे मम १५ ॥ सूत उवाच ॥ तदाद्यप्सर
सः सर्वाः सगंधर्वाः प्रहर्षिता संस्थिता मुनयः प्रीत्या तस्मिन्कौबेरमंडले १६ अतस्तत्र च ये गत्वा नरा ना
र्यो दृढव्रताः पूजयंति नमस्यंति श्रीमनोहरमाधवं १७ सौभाग्यपुत्रपौत्रादिधनधान्यसमाकुलाः भुक्त्वा
त्र विविधान्भोगान्वैकुंठे तेत्र जंति ते १८ क्षेत्रस्येशानदिग्भागे शंकराश्रममंडले अष्टमे वैष्णवे पीठे १

वरीवर्त्यसिमाधवः १९ अतसीपुष्पसंकाशः पीतांबरधरो युवा श्रीवत्सांकितो राजद्कुटिलालक
प्र.रा. संहतिः २० असितचर्मधरः स्रग्वी कूरः कोकनदेक्षणः बध्वा परिकरं तत्र सर्वदास्ते शिवांतिके २१ देव
१४१ दानवगंधर्वान्दैत्यान्राक्षसपन्नगान् नानाविघ्नकरान्सर्वान् तीर्थोपद्रवकारकान् २२ विधाय पूज
नं तस्य शक्तिकल्पितसाधनैः गृणाति च विरारूढस्तस्य परमो वैष्णवः शिवः २३ तत्रैकदा समाजग्मुः पा
तालतलवासिनः नागाश्च नागकन्याश्च द्रष्टुं हरिहरौ समं २४ उभावपि च संपूज्य भक्तिपूतेन चेतसा
बद्धांजलिपुटाः सर्वे स्थूरमो माधवयोः पुरः २५ तथाविधांश्च तान्दृष्ट्वा वाक्यमूचे सिमाधवः कुतो ह्याग
मनं जातं भवतां तलवासिनां २६ इति माधवजं वाक्यं श्रुत्वा प्रमुदिताननाः नागाश्च नागपत्न्यश्च प्रा
ब्रुवन्सिमाधवं २७ ॥ नागादय ऊचुः ॥ दुर्लभं दर्शनं लोके तव वैकुंठवासिनः कैलासवासिनो यस्य
सर्वेषां नो विशेषतः २८ तीर्थराजप्रभावेन युवयोर्दर्शनं समं भविष्यतीति निश्चित्य वयं संघसमागताः
२९ दर्शनं वामभूत्तन्नः संप्राप्तं तन्मनः फलं आज्ञां कुरुत मत्स्यमं ना यो वो किं करवामहे ३० इत्याक १४१
र्ण्य वचस्तेषां भक्त्याकलितचेतसां ऊचतुः सदयं वाक्यं माधवो माधवो द्विजाः ३१ स्थातव्यमत्र सततं तीर्थस्याव

योराश्रमांतिके भवद्भिर्भवती शिश्वसाविचार्य क्रियतां च नो ३२ ॥ सूत उवाच ॥ इत्युक्ते द्वे च स्याकर्ण्य सर्वे पा
तालवासिनः स्थितास्तत्र यथास्थानमनुभावपि सिषेविरे ३३ तन्मयेयमस्तिंतितेजनाः पापकृतो पिहि
ते तयोर्दर्शनाच्चांभ्यां तयोर्यास्यंति सत्पदे ३४ यत्किंचित्सुकृतं येत्र करिष्यंति च मानवाः स्त्र प्राप्यान पिरे
द्दिष्या [illegible] त्प्राप्स्यंति ते मनोरथान् ३५ एवं द्विजा माधवाख्यो लोकख्याताः शौनकादयः इदानीं नवमं वक्ष्ये संक
ष्टहरमाधवं ३६ सर्वेपि पूजयंत्येनं संस्तुवंति च सर्वदा सर्वसंकटनाशार्थमसौ सर्वत्र तिष्ठति ३७ तथापि वर्त
ते संध्यावटाधस्तस्य चाश्रमः तस्मिन्वसति धर्मात्मा संकष्टहरमाधवः ३८ यस्य यस्य यदापद्यते संकटं जायते भृ
शं तस्य तस्य तदा तन्निवारयति माधवः ३९ सायंप्रातर्द्विजाः सर्वे तिष्ठन्त्य परमर्षयः उपासते सदा संध्यां पू
जयंति च माधवं ४० संध्यावटस्य माहात्म्यं गदितुं केपि नेशते सं [illegible]
[illegible] तस्माद्द्विजवराः सर्वे गत्वा संध्यावटांतिकं संध्यामुपास्य विधिवत्पूजयंति च माधवं ४२ अकाले
प्यथवा काले संध्या नोपासिता मया तदघं हर मे सर्वं संध्यावटनमोस्तु ते ४३ एवं संध्यावटं प्रार्थ्य मुच्यंते
लोपपातकात् प्रसन्नश्च भवेत्तेषां संकष्टहरमाधवः ४४ गंगायमुनयोस्तीरे वेणीदेशे मनोहरे मध्ये वेणीत

टेवेणीमाधवोसौविराजते ४४ धनुर्विंशतिविस्तीर्णःतस्याग्रमउदाहृतः तस्मिन्तुतिष्ठत्यसौलक्ष्म्यात्रिवे
प्र·श· णासहितःसदा ४५ इंदीवरदलश्यामःकुशेशयनिभेक्षणः चतुर्भुजःशंखचक्रगदापद्मधरःप्रभुः ४६
१४२ श्रीवत्सकौस्तुभाशोभीपीतांबरविराजितः नानालंकारशोभिष्ठःप्रसन्नमुखपंकजः ४७ त्रिवर्णात्रिगुणात्म
हात्रिविधाघविनाशिनी त्रिमार्गगापुरस्तस्यत्रिवेणीराजतेशुभा ४८ देवदानवगांधर्वाऋषयःसिद्धचारणाः
चतुःषष्ठिकलाविद्यासिद्धयोप्सरसस्तथा ४९ सर्वपीठस्थिताःसर्वेतत्रगत्वाससाधनाः प्रत्यहंपूजयंत्येनंवे
णीमाधवमादरात् ५० फलंददातिसर्वेषांकुशलाकुशलात्मनां अमानपेक्षमविलंभक्तानांतुविशेषतः ५१ ध
र्ममर्थंचकामंचमोक्षंचेतिचतुष्टयं प्रयच्छतियथाकाममकामेमोक्षमेवहि ५२ श्रुतिस्मृतिपुराणानियंस्तुवं
तिहिमाधवं अमुष्मिन्नागराजकेत्रकःपदार्थोस्तिदुर्लभः ५३ काश्यांविश्वेश्वरःसाक्षादुपदिश्यतुतारकं मु
क्तिंददातिपापानांभोगंचैवयथायथं ५४ अत्रसर्वाणिपापानिमरणेसमुपागते विलयंयांतिसर्वाणिभुक्ति
र्मुक्तिश्चसिध्यति ५५ अतोस्मादपरंकिंवादयालुःशरणंवयं अजेमनतथान्योस्तिभुवनेष्वखिलेष्वपि ५६ इति १४२
निश्चित्यसर्वेपियांतितच्चरणांतिकं यंयमर्थमपेक्षंतेतेतमर्थंलभंतिते ५७ अतोजन्मसमासाद्यदुर्लभंमानु

६ सोमोब्रह्मसुतासूर्येमिदानींश्रृणुताहृतां ॥ वक्ष्येऽवांतरतीर्थानां ॥ नामयात्राविधिक्रमं ६

षंवरं सकृद्दर्शनमात्रेयेयांतिलब्धंतैरेवतत्फलं ५८ गंगायमुनासंभेदेस्नात्वेनंपूजयंतिये तेषांकरगतंजातं
पुरुषार्थचतुष्टयं ५९ ० मुख्यामुख्यतमोवेणीमाधवोवर्णितोमया कृपयाश्रीगुरोर्विप्राःकिमन्यत्कथयामि
वः ६१ ॥ इतिश्रीप·प्र·श्रीमाधववर्णनंनामपंचसप्ततितमोध्यायः ॥ ७५ ॥ ऋषयऊचुः ॥ सूतसूतमहाबुद्धेश्रुत्वा
माधववर्णनं वयंप्रमुदिताःसर्वेयतःपुण्यविवर्धकं १ अवांतराणितीर्थानितथापुण्यस्थलानिच परोप
कृतयेस्माकंतानिवर्णयविस्तरात् २ ॥ सूतउवाच ॥ सम्यक्पृष्टंमुनिश्रेष्ठाःपरोपकृतिकांक्षया भवद्भिस्तद
हंवक्ष्येश्रूयतामवधानतः ३ वटस्यदक्षिणेभागेशूलटंकेश्वरस्थले उत्तरेवर्ततेपुण्यंपुण्यातिशयकारकं
४ शूलटंकेश्वरस्तत्रवर्ततेपरमेश्वरः माधवस्यप्रसादार्थंविहायानंदकाननं ५ तत्रगत्वाचयेलोकाभ
क्त्यातंपूजयंतिते पत्रपुष्पफलैस्तोयैःप्राप्नुवंतिमनोगतं ६ त्रिरात्रमेकरात्रंवानिराहाराजितेजनाः रुद्रा
ध्यायंरुद्रसूक्तंशिवपंचाक्षरंमनुं ७ दक्षिणामूर्तिमंत्रंवाऽघोरमंत्रंचवैदिकं जपंतिप्रयतात्मानस्तेषांसि
द्धिःकरेस्थिता ८ तत्रजप्तंहुतंदत्तंयत्किंचिच्छिववल्लभं शंकरस्यप्रसादेनतस्यकालभयंनहि ९ तिलभां
डेश्वरस्तस्मात्पश्चिमेवर्ततेशिवः तस्यपूजनमात्रेणप्राप्यतेपुण्यमुत्तमं १० शूलटंकेश्वरेयेवैतिलभांडेश्व

रैतथा रुद्राभिषेकंकुर्वंति तेषांपुण्यमनंतकं कर्मसाक्षी जगन्मूर्त्तस्तत्रैवास्ते विनायकः साक्षीविनाय
रे·पु· कोनाम्नाफलसंपूर्तिकारकः संपूजयंति ये भक्त्या स्तुवंति च नमंति च निवेदयंति यात्रां च तेषां पूर्णं फलं भवे
१४२ त् १३ तस्यैव पश्चिमे भागे कुलस्तंभोऽतिशोभनः ब्रह्मणा स्थापितो यत्र कुलवृद्धिकरः सतां १४ तं पश्यंति न
मस्यंति पूजयंति परिक्रमैः कुलवृद्धिर्भवेत्तेषां यावच्चंद्रार्कमेदिनी १५ तस्यांतरे स्थिता ललिता कल्याणीति च
गीयते दर्शनस्पर्शपूजाभिः सर्वेषां सर्वकामदा तत्रैव वर्तते साक्षादीश्वरो ललितेश्वरः तस्य पूजनमा
त्रेण जायते शिववल्लभः १७ वटस्य पश्चिमे भागे सूर्यकुंडोऽतिशोभनः सूर्यो यत्र तपस्तेपे मुनयो बहुवा
सरं १८ ॥ऋषय ऊचुः॥ कुतः सोत्र तपस्तेपे भास्करो देवसत्तमः तद्ब्रूहि सूत नः सर्वं श्रवणे कांक्षावगाहते १९
॥सूत उवाच॥ वेदोदितानि कर्माणि स्वर्गमोक्षकराणि च तेषां प्रवर्तकः सूर्यस्तपस्तेपे पुरानघाः २० एवं त
पस्यतस्तस्य शौनकाद्या महर्षयः प्रसन्नस्तपसा तस्य पंतमाह वटमाधवः २१ ॥माधव उवाच॥ तपनत्वं तपः क
स्मात् तपस्यत्रोपतापनं तद्ब्रूहि तपतां श्रेष्ठ तपसः कारणं परं २२ ॥सूर्य उवाच॥ भगवंस्तपतोकेन कर्मणा स्या १४२
महेश्वः सर्वेषां कर्मफलदस्तस्मात्तव माधव २३ इदं हितास्थितं देवेंद्रष्टानान्यत्र मे मनः गंतुमुत्सहते ना

न्यत तोत्रैव वसाम्यहं इति सौरं वचः श्रुत्वा माधवो भक्तवत्सलः प्रत्युवाच वचो रम्यं सूर्यमात्मस्वरूपि
णं नृप ॥माधव उवाच॥ संतुष्टस्तपसा तेहं प्रयच्छामि तवेप्सितं मदाज्ञया त्वं सर्वेषामादित्यानां प्रभुर्भव २६
स्वस्थाने गच्छ भद्रं ते जगतां धुरमावह सर्वेषां त्वद्विना कर्म सर्वं लुप्तं भविष्यति २७ अत्रांशेन तिष्ठस्वकुं
डास्थानमनुत्तमं फलदो भव भक्तानां यात्रिकाणां विशेषतः २८ आदिष्टो माधवेनैवमोमित्युक्त्वागमद्धी
मान् स्वस्थानं परमं चक्रे सूर्यकुंडे मनोहरे २९ रोगापनोदनं नाम स्नानानां बलवर्धनं ह्यपस्मारकुष्ठादि
महारोगनिवारणं ३० अतोत्र सूर्यकुंडे ये स्नानं कुर्वंति मानवाः मुच्यंते सर्वरोगेभ्यः पापेभ्यश्च मुनीश्वराः
३१ सूर्यकुंडे नरः स्नात्वा यः कुर्यात्सूर्यपूजनं यावज्जन्म निरोगी स्यादिति माधवशासनं ३२ देवाश्च ऋष
यः सर्वे सूर्यकुंडे समंततः तिष्ठंति स्वाश्रमान्कृत्वा सूर्यभक्तिपरायणाः ३३ पुष्यार्कवासरे प्राप्ते रवावनुदि
ते सति स्नात्वा कुंडे विधानेन सूर्यं संपूजयंति ये ३४ आरोग्यं परमामृद्धिं तेजस्तेजस्विनः सुतान् लभंते
ते महाविद्यां सूर्यलोकं व्रजंति ते ३५ प्रदक्षिणां करिष्यंति सूर्यकुंडस्य ये नराः प्रदक्षिणीकृतं सर्वं तैः पूर्णा
वनिमंडलं ३६ ये कुर्वंति नमस्कारान् सौरमंत्रैर्यथाविधि तत्कल्पेन ते सद्यः प्राप्नुवंतीप्सितं फलं ३७

मानौमानौमहाराज संक्रांतिषु विशेषतः मनुजा ये करिष्यंति स्वर्गं तेषां भविष्यति ७ संक्रांतिषु तुलादाने
स्क॰ श्रा॰ विशेषाद्विषुवायने ये कुर्वंति यथाशक्त्या सूर्यस्तेभ्यः प्रसीदति ८ एवं वः सूर्यकुंडस्य महिमा वर्णितोऽनघाः
१४४ अन्यान्यपि तीर्थानि प्रवक्ष्यामि निबोधत ९ ॥ इति श्रीप॰ स्क॰ सूर्यकुंडमहिमावर्णनं नाम ष[illegible]
ध्यायः ॥ ७६ ॥ सूत उवाच ॥ शौनको जाय पप्रच्छ सूतपुत्रं पुरातनः सहोवाच पुनस्तान्वै तच्छृणुध्वं समाहिताः
१ ॥ शौनक उवाच ॥ श्रुतं वेदीस्थतीर्थानां नामग्रहणपूर्वकं सर्वेषामथ वक्ष्येऽहं स्नानदानादिजं फलं २ वरस्य दक्षि
णे भागे ह्यादिवेणी विराजते देवाश्च ऋषयः सर्वे सर्वदा तामुपासते ३ ॥ सनकादय ऊचुः ॥ अविमुक्तं न मुंचंति दे
वाश्च मुनयस्तथा इत्यस्माभिः श्रुतं पूर्वं नेत्रापिकृतं त्वयागताः ४ ॥ शौनक उवाच ॥ भोभो ब्रह्मसुताः सर्वे शृणुध्वं तु तत्
कृतसंशयाः निर्गुणं पदमासाद्य सगुणं को नु सेवते ५ सेवया लभ्यते यत्र तत्रान्यः को हि याचते फलं नानाविधं
यत्रैकमेवाभिकांक्षति ६ चतुरंगबलं यत्र नैकमाश्रयते बले यानं बहुविधं यत्र नैकमेवाधिरोहति ७ स
प्राप्ये च क्रवर्तित्वे सामंतत्वं न वांछति लभ्यमाने च देवत्वे मनुष्यत्वं क इच्छति ८ नरो बहुगुणाकांक्षी नैकमाश्र १४४
यते गुणं तथा सर्वफलाकांक्षी प्रयागं सेवते ध्रुवं ९ इष्टं इष्टमहित्वापि कल्पवृक्षं न मुंचति तथा भूवलयं दृष्ट्वा

प्रयागं न विमुंचति १० प्राप्य दैत्सुरवमुत्सृज्य स्वाप्निकं कोपि नेच्छति तथा प्रयागमुत्सृज्य विमुक्तिं कोपि नेच्छ
ति ११ सुखेन लभ्यते यत्र पुरुषार्थचतुष्टयं तत्यक्त्वा मुक्तिमात्रं कः कामयेत भोगवर्जितं १२ तावद्गर्जंति ती
र्थानि पृथिव्यां स्वस्वमंडले यावन्नाभ्युदयत्येषः प्रयागस्तीर्थनायकः १३ उपदेशं विना मोक्षं विना क्लेशमघा
द्दते देहत्यागे नवैदेत्स्यादनेकं सतां परः १४ पापहारीणि तीर्थानि यानि संति जगत्त्रये पुनंति तानि नात्मानं
तीर्थराजं विना क्वचित् १५ तस्मादत्रैव तिष्ठंति तीर्थदेवर्षयोऽखिलाः जानीध्वं निश्चितमिदं सनकाद्या महर्षयः
१६ अतो माघमासादिवेण्यां वै स्नानं कुर्वंति ये नराः तर्पयंति निजान्पितॄंस्ते ते वैकुंठगामिनः १७ आदिवेण्यां तु
ये किंचित्स्नानदानजपादिकं कुर्वंति कोटिगुणितं मतं तेषां भवति ध्रुवं १८ तस्याः पश्चिमभागे घृतकुल्यास्ति
शोभना तद्ये मधुकुल्या च तीर्थद्वयमिदं वरं १९ स्वयंभुवा सरोधाद्ब्राह्मणार्थे विनिर्मिते सर्पिषा मधुना पू
र्वं वाहिन्यौ सरितौ शुभे २० सर्वं पितॄन्द्विजमात्रं सर्वं न्यो ब्राह्मणानपि यथेष्टं पयसा कंठं घृतं च मधुरं मधु २१ ॥
तयोः स्नात्वा च यो भक्त्या तर्पयेत पितृदेवताः देवाश्च पितरस्तस्मै प्रयच्छंति बहून्वरान् २२ श्राद्धं नासि तर्पयेत
त्रश्राद्धं प्रकुर्वंति आवर्षं पितरस्तेषां तृप्तास्तिष्ठंति वै दिवि २३ तत्र दानं कृतं किंचित्तत्सर्वं बहु जायते फलं द

दाति दातॄणामिह लोके परत्र च तयोश्च पश्चिमे तीर्थमादित्यस्य निरंजनं सर्वदा यत्र तिष्ठंति देवाः सर्वे सवासवाः
२५ तत्र ये यात्रिकाले लोका गत्वा स्नानं प्रकुर्वते उपास्य मध्यमां संध्यामुपतिष्ठंति पूषणं २६ देवर्षिपितृणां तृ-
प्र॰श॰ प्तिं तिलापांजलि निश्चये कुर्वंति च यथाशक्ति दानान्यपि मुनीश्वराः २७ विमुक्तपातकाः सर्वे सूर्यलोकं व्रजंति
१४५ ते भित्वा बहुसर्वं तत्र जायंते वैदिका द्विजाः २८ तस्याथ पश्चिमे तीर्थमृणत्रयकरं परं ऋणप्रमोचनं नाम
देवर्षिपितृसेवितं २९ पंचदंडप्रमाणं तत्तीर्थं परमपावनं ऋणापाकरणं श्रेष्ठमृणत्रयविमोचनं ३० जन्म
जन्मांतरीणं स्याद्येन जन्मोद्भवं तथा तत्सर्वं नाशमायाति तत्तीर्थस्नानमात्रतः ३१ तत्र स्नानेन पूर्णायां पुन-
श्च न भवेदृणं विमुक्तो जायते सद्यो देवर्षिपितृणामृणात् ३२ अतस्तत्र च ये गत्वा स्नानं दानं प्रकुर्वते ऋणमु-
क्ता भवंत्येव त इह लोके परत्र च ३३ बहवस्तत्र निर्मुक्ता ऐहिकामुष्मिकादृणात् एतत्सर्वं मया दृष्टं व्रजसुग्रामसे-
जसः ३४ ॥ इति श्रीप॰ पु॰ आदिखण्डे ऋणमोचनतीर्थनिरूपणं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ शेष उ- १४५
वाच ॥ अस्मिंस्तीर्थे च वक्ष्येऽहमितिहासं पुरातनं यस्य श्रवणमात्रेण सर्वस्मान्मुच्यते ऋणात् १ आनंदकानने के-
श्चित् ब्राह्मणो वामनाभिधः कुटुंबी ममतासक्तो वेदवेदांगपारगः २ कर्मकांडेति निष्णातः समर्थोऽतिपर-

कामी प्रतिग्रहसमर्थश्च प्रतिग्रहपरोऽपि च सर्वप्रतिग्रहग्राही ग्राह्याग्राह्यविवर्जितः दुष्टदानप्रतिग्राही सर्व-
दानग्रहोद्यतः ३ सर्वार्जितप्रतिग्राही श्राद्धकर्मपरायणः एकादशान्नभोजी च प्रेतशय्यापरायणः ४ य-
स्तेन न गृहीतो हि वाराणस्यां प्रतिग्रहः नैतादृक् दृश्यते कोऽपि कुत्रापि सनकादयः ५ इति नानाविधोपा-
यैर्दुष्टैः संचितवान् धनं तथापि च दरिद्रोऽसावृणं गृह्णाति सर्वतः ६ ऋणं गृहीत्वा विप्रेभ्यः कुटुंबं पोषयत्य-
सौ स्वयं पिष्टान्नमश्नाति सर्वदा यत्र कुत्रचित् ७ किं चित्रं युक्तमेवैतत् कुमार्गोपार्जितं धनं शीघ्रं नश्यत्यवि-
ज्ञातं भुंक्ते पापफलं च सः ८ सन्मार्गेणार्जितं द्रव्यमल्पमप्यधिकायते न नश्यति कदाप्येतत्फलं यच्छति शोभनं
१० न एवात्र द्विजा धन्यास्तस्मात्पापधनेन ये पोषयंति कुटुंबं स्वं पापद्रव्यपराङ्मुखाः ११ तस्यैवं वर्तमानस्य
कुटुंबासक्तचेतसः दुर्जरं पातकं जातं बहूनां च ऋणं तथा १२ ऋणदुःखेन भिन्नात्मा भुनक्ति म्रियमाणमनाः यो
द्रव्यं याचते सोऽपि न तेन सह भाषते १३ न तस्य यात्यग्रहे नैव दिवसे निशि तिष्ठति स्वयं मुक्तिमंडपिकायां रात्रौ स्व-
पिति नित्यशः १४ निर्गमानस्ततः काशीं स सर्वत्रामृणपीडितः त्यक्त्वा काशीं जगामासौ ग्रामांतरमलंहितः १५
तत्राप्यनेन मार्गेण बिभर्ति स्वोदरं शठः ततो बहुतरे काले वृद्धः पंचत्वमापसः १६ क्रियाकर्तृअभावेन स्वीयपा-

पश्चात्तदा नाग्निदाहोऽभवत्तस्य न कर्म चाप्यौर्ध्वदेहिकं १७ यमलोकमथो नेतुं कालदूताः समागताः क
अ·श· रालाः पाशहस्ताश्च यमशासनकारिणः १८ अंगुष्ठमात्रं पुरुषं पाशैर्बध्वा यमाज्ञया निन्युस्ते निर्मुद्गरैश्च ताड
१४६ यंतः कशादिभिः १९ नीत्वा संयमिनीं शीघ्रमंतकाय निवेदितं प्राहुः प्रांजलयो दूता धर्मराजं वचो मृदु २०
॥दूता ऊचुः॥ धर्मराज द्विजश्चायमानीतो वामनाभिधः आज्ञां देहि सुरश्रेष्ठ किं कर्तव्यमनुष्य वै २१ दूतवा
क्यं समाकर्ण्य चित्रगुप्तं यमोऽब्रवीत् यद्भवेदस्य कर्तव्यं दृष्ट्वा तद्ब्रूहि सत्वरं २२ चित्रगुप्तोपि दृष्ट्वैनमूचे सं
यमनीपतिं क्रमेण सर्वनरकेष्वयं पात्यो ह्यतिपातकी २३ श्रुत्वा तदुद्यताः सर्वे निन्युस्तं नरकांतिकं पातना
यायमं चक्रुस्तावच्चित्रमभूत्तद्द्विजाः २४ तस्मिन्काले महान्कश्चिद्गृध्रस्तस्य कलेवरात् खंडमेकमुपा
दाय गगने चोदडीयत २५ तत्पृष्ठे बहवो गृध्राः समायाताः पलेच्छया तान्दृष्ट्वातिद्रुतं गृध्रः सोपि जगाम वि
हायसा २६ आजगाम गृहीत्वा तत्सयागस्योपमंडले ऋणप्रमोचनादूर्ध्वं तावत्तेपि समागताः २७ तस्य
तैरभवद्युद्धं बलिनो बलिभिः सह तावत्तदंतरे तद्दास्यात्तत्कलेवरं निपपात ह २८ पतितं तन्महापुण्ये ऋणमोचन १४६
मंडले तेनासौ मुक्तपापश्च धर्मात्मा वामनः २९ ततो विमानमारुह्य विष्णुदूता यमांतिकं गत्वाभिजगदुः
ते २

काले विप्रोऽसौ मुच्यतामिति ३० इत्युक्त्वा तं समानीय विशदं दिव्यवपुर्धरं स्वविमाने समारोप्य निन्युर्वैकुं
ठमंदिरं ३१ ऋणमोचनमाहात्म्यं को वा गदितुमर्हति यत्र भूमिस्पर्शमात्रेण संमुक्तो ऋणपातकैः ३२
तस्मादत्र मुनिश्रेष्ठा देशदेशांतरागताः स्नानदानादिकं कर्म कारयंत्यृणमोचने ३३ ऋणैर्विमुक्तास्ते स
र्वे सप्तजन्मकृतैरपि निष्पापा निर्मला भूत्वा यास्यंति हरिमंदिरं ३४ ऋणमोचनमाहात्म्यमेवमुक्तं यथाश्रु
तं अथापरं प्रवक्ष्यामि सत्तीर्थं सनकादयः ३५ ॥इतिश्रीप·उ·ख· ऋणमोचनतीर्थमहिमावर्णनंनामाष्ट
सप्ततितमोऽध्यायः॥ ७८ ॥ईश्वर उवाच॥ तस्य पश्चिमभागे तु पापमोचनमुत्तमं तीर्थं संभूतपापघ्नमन्य
पापविनाशनं १ कायिकं वाचिकं मानसिकं च त्रिविधं ह्यघं एतज्जन्मसमुद्भूतं च जन्मजन्मांतरार्जितं २
आर्द्रं शुष्कं लघु स्थूलं ज्ञातमज्ञातपातकं तत्सर्वं नाशमायाति तत्तीर्थस्नानमात्रतः ३ तत्र स्नात्वा च ये न
रोत्तमास्तर्पयंति पितॄन्स्वकान् तदैव पितरस्तेषां प्रयांति परां गतिं ४ दशार्द्धात्मकं तीर्थं तद्धि धार्मिकं पुरा
तनैः तत्राहं यत्कृतं कर्म स्नानदानजपादिकं ५ अस्मिन्नर्थे मुनिश्रेष्ठा वक्ष्ये पुण्यं कथानकं सम्यक्छ्रु
तः समाधाय तत्सर्वमवधार्यतां ६ पुरा चंद्रपुरे रम्ये विप्र आसीन्महामतिः वेदशास्त्रप्रवीणश्च सदाचा

रः रतः सदा ७ तत्पत्नी ललिता नाम्नी पतिशुश्रूषणे रता स्वधर्मनिरता नित्यं सत्यवागल्पभाषिणी ८ तया
व्र.शा. साकं सधर्मो तामगार्हस्थ्यं बुभुजे सुखं षट्कर्माण्याचरन्नित्यं विष्णुभक्तिपरायणः ९ एवं काले सुसंवृत्ते मध्य
१४७ मेवयसि स्थितः ज्वरेण पीडितोत्यर्थं ममार सतकादयः १० स सदाचरणेनापि धर्माचरणतोपि च स्वर्गप्राप्तम
रोभूत्वा भुंजन्भोगाननुवासह ११ अथात्र ललिता दृष्ट्वा मृतं पतिमपुत्रका भृशं विलप्य करुणं संस्तभ्यात्मानमात्म
ना १२ तस्यौर्ध्वदैहिकं कृत्यं ब्राह्मणानामनुज्ञया यथाशक्ति यथावित्तं स्वयमेव चकार सा १३ ततस्तस्य स्वगेहे सा
स्वधर्मनिरता सदा स्वदेहं शोधयामास व्रतैर्नानाविधैरपि १४ स्त्रीणामयं परो धर्मः श्रुतिस्मृतिविनिश्चितः पतिसे
वानुवर्तित्वं तद्वचः परिपालनं १५ मृते त्वारोहणं तस्मिन्ब्रह्मचर्यमथापि वा यावज्जीवं प्रकर्तव्यं तेन तासां सतीग
तिः १६ इत्थं सा वर्तमानापि दुष्प्राचीनकर्मणा तरुणी रूपसंपन्ना मतिभेदमवाप सा १७ तां दृष्ट्वा ललितांगीं गा
भृशं ललितयौवनां एकाकिनीं भोक्तुकामा नानोपायान्प्रचक्रिरे १८ तत्समीपस्थिता काचिद्ब्राह्मणी व्यभिचारिणी १४७
तद्द्वारा बोधयामासुर्ललितां ललिताकृतिं १९ सा तत्समीपमागत्य व्यभिचारधुरंधरा संभली त्वमुरीकृत्य जगा
द ललितं वचः २० ॥संभल्युवाच॥ ललिते तव सौंदर्यं दृष्ट्वा तारुण्यमेव च भोगहीनमिति ज्ञात्वा भृशं तप्याम्यहं भृ

शं २१ तवेदं यौवनं व्यर्थं स्वरूपं च सुशोभनं गतं न पुनरायाति विना जन्मांतरं खलु २२ भोगांस्त्वं भुंक्ष्व सततं
जारैः सह सुमध्यमे गते जले पुनर्व्यर्थं केदारकरणं यतः २३ मद्गृहे बहवो यांति सुरूपास्तरुणा नराः अहं भुन
ज्मि तैः सत्रा जारैः संभोगं सुसुखं २४ मयानुभूतं तत्सौख्यं न तवाप्यस्ति मे मतिः अतो हं प्रशंसामि सर्वशास्त्र
वुपंडिताः २५ आगमिष्यसि वेश्म मम अधुनैव वरंतिके तानानयामि तरुणान्रूपाढ्यान्भकोविदान् २६ सहृत्व
यानुभूतं चेन्नत्सुखं कामतत्त्वया न त्वहास्ति करापि नान्वयमाकारयिष्यसि २७ एवं प्रलोभिता वाक्यैर्ललिता
काममर्जिता अंगीचकार तद्वाक्यं तथाचरदशंकिता २८ तेपि तद्वचसा नित्यमागत्यैव तद्गृहं विटाः ललितां ता
नयामासुः स्वीयधर्माद्धर्षिणः २९ पापकर्म ततो नित्यं चरंत्यस्ते उभे स्त्रियौ धनं जगृहतुस्तेभ्यः स्वभोगार्थं वि
टेभ्यतः ३० कुलजातिवयोरूपधर्मक्रीडापराङ्मुखे द्रव्यमात्ररते नित्यं चक्रतुर्व्यभिचारिकं ३१ एकस्मिन्दि
वसे केपि नागता धनिनस्तदा प्रतीक्षां चक्रतुर्द्वारे ते उभे प्रहरावधि ३२ ततस्तेन पथा कश्चिद्गच्छन्विप्रो वि
लोकितः तमाहूय गृहं नीत्वा बुभुजाते सुनासुखं ३३ ततो निनिंदुस्ते सर्वे तं गपुद्रव्याकुलाः रात्र्यां ते कालस
र्पेण संदष्टे ते उभे स्त्रियौ ३४ पापराशी मृते दृष्ट्वा यमदूताः समागताः बध्वा पाशेन ते मे निन्युर्यमसदनालयं ३५

ततो दृष्ट्वा तयोः कर्म नरकार्हं विचिंत्य च यमात्तां प्राप्य ते दूता निन्युर्निरयसंनिधिं ३६ भ्रातस्त्याय विप्रो सावु
भे दृष्ट्वा मृते स्त्रियौ शुशोच भिन्नहृदयो भ्रष्टांतद्विरहाकुलः ३७ पश्यतां हो महत्स्वर्यं स्वसृतं दुर्भगस्य मे संगमा
प्र·श· त्रान्मृते चो भे धिङ्मां पापनिधिं बत ३८ विलप्यैवं स दुःखेन तयोः स्नात्वा वसीयं गृहादिकं तयोर्वस्त्रे समादाय निःसृत
१४८ स्ततुरा द्विजः ३९ दुःखेन महता व्याप्तः स्नेहडाकुलितेंद्रियः विलपन् विभ्रमन् विप्रस्तीर्थराजं समगात ४० पा
पमोचन तदिग्भागे समासीनः स वासमी अशांतस्तत्र प्रसुप्याप विलप्य च पुनः पुनः ४१ पापमोचनभूभागस्प
र्शमात्रेण वाससोः नष्टं पापं तयोः सर्वं व्यभिचारादिसंभवं ४२ तावद्विष्णुना आनीतं विमानमधिरुह्य ते ब्रा
ह्मणेपकृतिं ज्ञात्वा समायाते तदंतिके ४३ गत्वा तमूचतुर्विप्रं किं खेदं असि महामते उत्तिष्ठोत्तिष्ठ भद्रं ते त्वया
वां तारिते बलात् ४४ इति श्रुत्वा स चोत्थाय पूर्ववद्दृष्टे विलोक्य ते स्नात्वा तदा ज्ञया विप्रो देवयाने समारुहत् ४
५ दिव्यरूपधराः सर्वे दिव्यवस्त्रविभूषणाः जग्मुर्वैकुंठभवनं दिव्यस्रगनुलेपनाः ४६ पापमोचनमाहात्म्यमे
वं वः कथितं मया वस्त्रसंपर्कमात्रेण यत्र पापा दिवं गताः ४७ अतोऽत्र ये करिष्यंति स्नानदानजपादिकं ते पा १४८
पनिर्गडं छित्वा यास्यंति हरिसंनिधिं ४८ पापमोचनतीर्थस्य महिमा वर्णितो मया अथोन्यतीर्थमाहात्म्यं व

MEMORIAL

दाम्मि सनकादयः ४९ ॥ इति श्रीप॰ प्र॰ पापमोचनमहिमा वर्णनं नाम एकोनाशीतितमोऽध्यायः ॥ ७९ ॥—१—
रामतीर्थमथो वक्ष्ये रामेणाधिष्ठितं यतः निंदापैशुन्यघातादि पापक्षयकरं परं १ वेदनिंदापरा ये च गुरुनिं
दापराश्च ये वेदनिंदापराश्चैव तीर्थनिंदापरायणाः २ पितृनिंदापरा ये च परनिंदापराश्च ये ते त्रमज्जनमा
त्रेण पूता स्नातो भवंति वै ३ सर्वकामप्रदं तीर्थं जामदग्न्येन प्रकाशितं सर्वरोगहरं पथ्यं पराक्रमविवर्धनं ४
॥ सनकादय ऊचुः ॥ कथं वै जामदग्न्येन तद्धि तीर्थं प्रकाशितं तद्वदस्व यथापूर्वं येन नश्येत संशयः ५ ॥ श्रीगुरु उ
वाच ॥ पूर्वं परशुरामेण सत्वरं पितृराज्ञया रेणुका निहता माता जमदग्नेः प्रियं कृतं ६ ततो मातृवधेनासौ
प्रसन्नो मुनिराह तं राम ते हं प्रसन्नोऽस्मि महाज्ञापरिपालनात् ७ वरं वरय भद्रं ते मत्तः शीघ्रं मनोगतं श्रुत्वा
तां पितृवाणीं स याचे मातृजीवनं ८ मुनिस्तथेति प्राह रेणुकाप्युत्थिता सती दृष्ट्वा पितां स संतेपे स्वमा
तुः शिरःकृतादघात् ९ पापं मनसि संधाय पितरं प्राह भार्गवः मयाचरितपापस्य निष्कृतिर्ब्रूहि मे पितः १० सहो
वाच पुना रामं पापं मातृवधोद्भवं समस्ततीर्थयात्राभिः परागुदममाज्ञया ११ ततः पितुर्वचनं श्रुत्वा गृहीत्वा
परशुं स्वकं चचाल तीर्थयात्रायै सहितो मुनिभिः पुरा तु १२ विभ्रामन् रमानो सौ तीर्थयात्राप्रसंगतः प्रयाग

माजगामांते बहुभिः परिवारितः १३ पापमोचनतीर्थस्य पश्चिमे भूमिमंडले उवास सर्वसहितः प्रसन्नात्मा
प्र.श्री. स भार्गवः १४ ततः स्नात्वा त्रिवेण्यां तेन कृत्वा मुंडनमुत्तमं ब्राह्मणान्भोजयामास कृत्वा श्राद्धानि विस्तरात् १५
१४९ रामोपि सकलं कृत्वा कृत्यं श्राद्धं तमुत्तमं गोदानानि चकाराथ ब्राह्मणेभ्यो यथाविधि १६ पूर्वोक्तेन विधानेन
मुख्यकल्पानुसारतः ददौ पश्चु रामोत्र कोटिधेनूरलंकृताः १७ बहून्यन्यानि दानानि यथाविधि यथाधनं
द्विजेभ्यः प्रददौ भक्त्या माधवप्रीतये परं १८ चक्रुरन्येपि दानानि स्वस्ववित्तानुसारतः ब्राह्मणांस्तोषयामा
सुस्तीर्थराजनिवासिनः १९ ज्ञात्वा तीर्थस्य माहात्म्यं रामः संतुष्टमानसः निवासाय मतिं चक्रे कृत्वाश्रम
मनुत्तमं २० तदारभ्य ततस्तीर्थं रामतीर्थमिति स्मृतं त्रिंशद्धनुःप्रमाणं तद्धर्मबाहुल्यकारकं २१ तस्मिंस्ती
र्थे तु यः कश्चिद्दानं कुरुते नरः कोटिगोदानजं पुण्यं स प्राप्नोति न संशयः २२ कदाचिदागता वाणी वीणा
पुस्तकधारिणी रामाश्रमपदं द्रष्टुं तीर्थप्रांतविहारिणी [illegible] जामदग्न्यस्तु तां दृष्ट्वा सहसोत्थाय सादरं प्रांज
लिः पुरतः स्थित्वा नत्वा स्तुत्वाब्रवीद्वचः २४ ॥ राम उवाच ॥ सरस्वति नमस्तेस्तु त्वं कुत्रात्र समागता तद्ब्रूहि १४९
सकलं वृत्तं प्रसादं कुरु ते नमः २५ जामदग्न्यवचः श्रुत्वा तीर्थराजे तिलालसा वीणावाद्यरसाभिज्ञा

वाणी सरस्वती २६ ॥ सरस्वत्युवाच ॥ राम राम महाबाहो क्षेत्रमेतदनुत्तमं ब्रह्मांडादधिकं दृष्ट्वा वसाम्यत्र
यथासुखं २७ गंगायमुनयोः संयोगस्तु रूपा वसाम्यहं पंचक्रोशात्मके क्षेत्रे यथेच्छं विहरामि च २८ त्वय
त्वामागतं श्रुत्वा द्रष्टुं त्वां समुपागता त्वमप्यत्रैव तिष्ठस्व तीर्थे सर्वोत्तमोत्तमे २९ इति सारस्वतीं वाचं श्रुत्वा रा
मोतिहर्षितः उपवेश्यासने वाणीं वचनं पुनरब्रवीत् ३० ॥ राम उवाच ॥ त्वमस्य तीर्थराजस्य स्तवनं कुरु शार
दे तच्छ्रुत्वात्रैव तिष्ठामि नयाभीतः क्व च स्थले ३१ ॥ सरस्वत्युवाच ॥ पररूपा च पश्यंती मध्यमा वैखरीति च च
तूरूपाहमेवास्मि पंचमी नास्तिका च न ३२ साहमस्य स्तवे पूर्वं प्रवृत्ता विधिशासनात् यावच्छक्यं स्तुतिं कृत्वा
गुणानंत्यात्पराङ्मुखता ३३ तदा व्यासेन रक्ताहं स्तवाय सामर्थ्यजा तथा ह्रियं तु त्वा वसाम्यंतर्गंगायमुनसंगमे
स्प८ ३४ अतोत्र मे स्तवने कः शक्तोस्ति जगत्त्रये त्यक्त्वा वैकुंठभवनं हरिर्यमधितिष्ठति ३५ अस्मिन्नेवाश्रमे
राम त्वया स्थेयं यथासुखं रामतीर्थमिति ख्यातिं यास्यतीदं तव स्थलं ३६ राज्यकामाश्च ये केचित् करिष्यं
ति दशाशयाः पंचाग्निद्वादशाब्दानि साधनेन यथाविधि ३७ धूमपानं तथाकाश जलवासं विकर्तनेन क
रीषाग्निविधानं च लक्षं तेतेमनोगतं ३८ अन्यानि क्रूरकर्माणि कुर्वतामत्रवेन्नृणां अखंडभूपतित्वा

दिफलंतेषां सुनिश्चितं ३१ ॥ इतिश्रीप॰प्र॰ रामतीर्थवर्णनंनामाशीतितमोध्यायः ॥ ८० ॥ रामउवाच ॥ पंचा
प॰ पु॰ ग्न्यादेस्तथाधूम्रपानादेश्च विधिं वद तमत्राहं करिष्यामि करिष्यंत्यपरेजनाः १ ॥ सूतउवाच ॥ पंचाग्न्या
१५० देःसाधनस्यविधिं वक्ष्येप्रयत्नतः तथैवजलवासादेः शृणु राम यथाश्रुतं २ आदौ भूशोधनं कुर्याच्चि
कीर्षन्नग्निसाधनं प्राचीं संसाध्य यत्नेन वेदिं कुर्यान्मनोरमां ३ पंचहस्तदशहस्तैश्चविस्तृतां चकरोछ्रितां
कूर्मपृष्ठोन्नतां श्लक्ष्णां गोमयाद्युपलेपितां ४ तस्यां विदिक्षु कुर्वीत राम कुंडचतुष्टयं चतुर्विंशांगुलं यो
निमेखलाकंठभूषिते ५ हस्तमात्रा प्रकर्तव्या मध्ये स्वासनवेदिका पंचाग्निसाधने प्रोक्तं वेदीकुंडादिल
क्षणं ६ यदा तु द्वादशाग्नीनां साधनं कर्तुमीहते कुंडानां तु चतुष्कं प्राक्प्राग्वदुपितथैवतत् ७ कुंडद्वयं
तथायाम्यामेककुंडंतदोत्तरे मध्ये तु पूर्ववद्वेदिः स्वासनार्थं प्रकल्पयेत् ८ ततः शुभेह्नि कर्ता च कृतनि
त्यक्रियः शुचिः देशकालावनुस्मृत्य फलमुद्दिश्य मानसं ९ संकल्प्य पूजयेत्पश्चाद्विघ्नेशं स्वस्ति वाच
येत् द्विजैः सह स्वगृह्योक्तविधिनाविदधीत सत् १० दिक्पालान्पूजयेत्पश्चादिंद्रादीन्दशचक्रमात् कलशां १ १५०
स्थापयेत्तत्रवारिपूर्णाननलंकृतान् ११ बलिदानं प्रकर्तव्यं माषान्नेनाष्टदिक्ष्वपि ततोग्निस्थापनं कुर्यात्स्वगृह्यो

क्तविधानतः १२ अरणीसंभवं वह्निं सूर्यकांतसमुद्भवं अथवाग्निं श्रोत्रियागारादानीय स्थापयेत्क्रमात् १३
आग्नेय्यां तु सहस्रार्चिर्नैरृत्यां स्वस्तिनामकः सप्तजिह्वस्तु वायव्यामीशे वैश्वानरस्तथा १४ स्थापनं द्वादशा
ग्नीनामीशानीतः क्रमाच्चरेत् सहस्रार्चिश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः १५ वैश्वानरो जातवेदा धूमव्या
पी हुताशनः हव्यवट् शिखिनामा च देवपोषस्तथांतिमः १६ एवं वह्नीन्प्रतिष्ठाप्य ध्यात्वा परिसमूह्य च प
रिस्तीर्याथ पर्युक्ष्य जुहुयात्सघृतांस्तिलान् १७ सहस्रं तु जुहुयादिष्टमंत्रेण प्रथमेहनि प्रत्यहं तु दशांशेन ज
पस्य हवनं चरेत् १८ एवं कृत्वा महाकाष्ठैः प्रज्वाल्याग्निं समंततः भूतशुद्ध्यादिकं कृत्वा ध्यात्वा स्वेष्टदेव
तां १९ मध्ये स्थित्वा जपेन्मंत्रं रवौ विन्यस्तलोचनः अनाहतं भागं कुर्वीत पुरश्चरणमुत्तमं २० मुहूर्तत्रितयं नि
त्यं कर्म कृत्वा ततः परं उपविश्यासने मध्ये वह्निज्वालापरीवृतः २१ मुहूर्तत्रितयं यावद्दिने शेषमतंद्रितः प्र
सन्नाचलचित्तस्सन्निष्टमंत्रं समभ्यसेत् २२ वसंतग्रीष्मयोः कुर्यादेतत्कर्म त्रयं बुधः कर्मद्वयमिदं प्रोक्तं तृती
यमवधारय २३ वक्ष्ये परशुरामाथ धूम्रपानविधिं शुभं यस्यानुष्ठानमात्रेण स्वेष्टसिद्धिर्न संशयः २४ पूर्वो
क्तविधिना कृत्वा वेदीं पंचकरां शुभां हस्तमात्रे तु तन्मध्ये कुंडं कुर्यात्सलक्षणं २५ दक्षिणोत्तरयोर्वंशाः पंचह

ग्नौ सकर्णिको क्षीरवृक्षभवो ऽथवा भो निखनेत्पंचमांशतः २६ तन्मध्ये नलिकां दत्वा सरलां सुदृढां नवां तस्याः
ग्र·श· कोटिद्वये कार्यो त्रिशूलो षोडशांगुलो २७ मंडपस्तत्र कर्तव्यः पताकाध्वजभूषितः सर्वलक्षणसंपन्न इति
१५१ केचन मन्वते २८ सुमुहूर्ते ततः कृत्वा कृतनित्यक्रियः शुचिः गणेशं पूजयित्वा च पुण्याहं वाचयेत् द्विजैः २९
स्वशाखोक्तविधानेन कुंडे ऽग्निं स्थाप्य पूर्ववत् कृत्वाध्यानादिकं सर्वं ततो हवनमाचरेत् ३० तिलव्रीहियवान्ना
ज्यान्नानां गारे नो सहस्रकं गायत्र्या जुहुयाद्वापि स्वेष्टमंत्रेण साधकः ३१ ततो जसा निर्माकाघशरावेण समंत
तः तन्मध्ये विवरं कुर्यात् चतुरंगुलमानकं ३२ तस्मिन्निवेश्य पात्रस्थ श्लक्ष्णा नलिका द्वादशांगुला मूले स्थूला
च सरला संकोचाग्रा विलान्विता ३३ तस्योपरि स्वयं तिष्ठेल्लंबमानो ह्यधोमुखः स्थूणाया मध्यमे भागे र
ज्वा बद्धपदांबुजः ३४ नलिकाग्रं मुखे दत्त्वा पिबेद्धूमं शनैः शनैः स्वेष्टमंत्रं जपंस्तिष्ठेन्मुहूर्तत्रितयावधि
३५ मुहूर्तत्रितयं प्रातर्दिनांते तावदेव हि कालद्वये पि कुर्वीत धूम्रपानमतंद्रितः ३६ प्रातर्जपदशांशेन हुत्वा
सायं पिबेदमुं सायं जपदशांशेन प्रातर्हुत्वा पिबेदमुं ३७ अनेन विधिना यस्तु तपश्चरति दारुणं सर्वान्का १५१
मानवाप्नोति किं कार्यस्तस्य सिद्धयः ३८ प्रयोगो यस्तु कुर्वीत वर्षसाध्यमिदं तपः इहलोके परत्रापि सल

मेद्वांछितं फलं ३९ आकाशवासं कुर्वीत वर्षासु च शरद्यपि जलवासं प्रकुर्वीत हेमंते शिशिरे पि च ४०
छित्वा स्वदेहमांसानि शाकं तेभ्यो ददाति यः समालभेत सुखं स्वर्गे भुक्त्वा भूमिपतिर्भवेत् ४१ शुष्कगोमयखं
डानां चूर्णं चूर्णोपटे स्वयं कृतनित्यक्रियो भूत्वा ऽकंठं चूर्णेन पूरयेत् ४२ पुरतो वह्निमुद्दीप्य फलमुद्दि
श्य वांछितं जपन्मंत्रं हरिं ध्यायन्भस्मीकुर्यात्स्वकां तनुं ४३ एवं यः कुरुते क्रूरं प्रयोगं कर्म मानवः यं य
यं कामयते कामं तं तमाप्नोति निश्चितं ४४ स्वलोम सम संख्यानि भुक्त्वा स्वर्गे सुखं ततः ततः स्वर्गात्परि
भ्रष्टो जंबूद्वीपाधिपो भवेत् ४५ अकामो मुक्तिकामो वा प्रयोगेनेन कर्मणा माधवस्य प्रसादेन मुक्तिमा
प्नोति निश्चितं ४६ इति ते कथितं सर्वं मया भार्गवनंदन पार्वत्यै शंकरेणोक्तं तत्रीत्याकर्मसप्तकं ४७
॥श्रीषउवाच॥ इति सारस्वतं वाक्यं श्रुत्वासौ भृगुनंदनः पुनरप्येवमाहाथ वाणीं मतिमतां वरः ४८ ॥रा
मउवाच॥ सम्यग्युक्तं भवेत्वेदं प्रयोगं कर्मसप्तकं तच्छ्रुत्वाने दिमापन्नो मानसं मम शारदे ४९ ममाश्रमं
तिके स्थेयं भवत्यानुग्रहान्मयि सर्वलोकोपकारार्थं मत्रस्थानां तरं कुरु ५० तथेति तं प्रतिज्ञाय कृत्वा
तीर्थं मनोरमं नाम्ना सरस्वतीकुंडं तत्राभ्यंशेन संस्थिता ५१ तस्मिन्कुंडे तु ये स्नानं दानं तस्याः प्रपूज

नं करिष्यंति नरा नार्यस्ते यांति ब्रह्मणः परं ५२ तदग्रे चापरं तीर्थं नाम्ना गोघट्टनं स्मृतं गवां संघट्ट
प्र.श. नेनेदं दत्तानां भार्गविप्रेत ५३ तत्रापि स्नानदानादिकरणाद्दीप्सितं फलं तीर्थत्रयमिदं प्रोक्तं मयोन्यच्च
१५२ वदामि वः ५४ ॥ इति श्री प॰ प्र॰ रामतीर्थादिगोघट्टनांतवर्णनं नाम एकाशीतितमोध्यायः ॥ ८१ ॥ ऋषय उवाच
तस्यापि पश्चिमे भागे वर्तते सनकादयः पिशाचमोचनं नाम तीर्थं परमपावनं १ तत्तीर्थस्नानमात्रेण
पापं नश्यति तत्क्षणात् रक्षोभूतपिशाचानां भयं चापि प्रणश्यति २ ये केचित्स्वकुले जाताः पिशाचाः पाप
कर्मणा तत्र स्नानेन दानेन तेषां मोक्षो भवेद्ध्रुवं ३ तस्याप्यपश्चिमे भागे कामतीर्थमनुत्तमं कामेश्वरो
पि तत्रास्ति तस्य तीर्थस्य दैवतं ४ तस्मिंस्तीर्थे तु यः स्नात्वा कामेश्वरमथार्चयेत् सर्वकामसमृद्धोसौ परत्रे
हापि जायते ५ तस्यापि पश्चिमे भागे कापिलं तीर्थमुत्तमं ज्ञानप्रदं च भक्तानां कपिलेन प्रकाशितं ६ कपि
लेनैव तत्तीर्थस्थापितश्चेंदिरेश्वरः तस्य दर्शनमात्रेण कृतकृत्यो भवेन्नरः ७ स्नात्वा तु कापिले तीर्थे पूज १५२
येदिंदिरेश्वरं योसौ पापविनिर्मुक्तो विज्ञानं लभते मलं ८ इंदिरेश्वरमारभ्य यावत्तद्दीकमंडलं असंख्या
तानि तीर्थानि तन्मध्ये निवसंति हि ९ यत्र कुत्रापि तन्मध्ये स्नानदानजपादिकं कुर्वतां पापनाशः स्यात्फ

लं चाविकलं भवेत् १० अथ पतद्दीकतीर्थस्य महिमानं ब्रुवे नघाः तत्रास्ति तात्तकं कुंडं तथास्ते तत्तके
श्वरः ११ तस्मिन्कुंडे नरः स्नात्वा पूजयेत्तत्तकेश्वरं यस्य दर्शनमात्रेण विषबाधा न जायते १२ सर्पेभ्यो
वृश्चिकेभ्यश्च विषवल्लीभ्य एव च नानाविषविघातेभ्यो भयं नैव प्रजायते १३ कदाचिदश्विनो देवौ श
त्रोपारदकर्मणि कृतोद्योगौ वनं यातौ किष्किंधे पर्वतोत्तमे १४ रसराजं विनिर्माय कष्टेन परमेण तौ सं
स्थाप्य कंदरायां तं गुप्तमायतनं गृहे १५ तदासौ तत्तकस्तेन तु छलेनापीयतं रसं गत्वा पाताल विवरे साश
कस्तत्र तस्थिवान् १६ ततस्तावागतौ तत्र नासत्यौ रसभाजनं उद्घाट्यालोकयतां शून्यं विस्मितावि दस्रूचतुः
१७ केन नीतं कथं नीतं कस्य जातं फलोन्मुखं एकेन साध्यते येन भुज्यते नेति विश्रुतिः १८ तथापि
स्वर्गिणां देवं कथयामः प्रभुं किल विचार्यैवं गतौ स्वर्गं कथयामासतुर्हरिं १९ ॥ नासत्यावूचतुः ॥ देवेंद्र वा
नजानीवः केन नावौषधं हृतं जानासि यदि सूक्ष्मदृष्टिकरिष्या वत्स योग्यं २० तच्छ्रुत्वेंद्रो वदत्ताभ्यां नेतादृक्को
पि दृश्यते त्रैलोक्ये कोपि तं शास्मीय यत्र कुत्रापि दृश्यतां २१ अन्विष्यतो ततः स्वर्गं मृत्युलोके विलोक्य च पाता
लमीयतुरन्वेष्टुं रसतस्करं २२ तावत्तावागतौ दृष्ट्वा माद्भुतं तत्तकस्फली पलायनं निलीया श्रुच्चके

पातालतोबली ॥ आगात्य तीर्थराजे सो ऽयागेगात साध्वसः प्रविश्य यामुने कुंडे निलीयावस्थितस्तदा
॥ अथाश्विनौ तमन्विष्य पाताले सर्वतस्तदा अदृष्ट्वा तं ततो गत्वा देवं द्वं पुनरूचतुः ॥ ॥नासत्यावूचतुः॥
प्र.श. त्रैलोक्यं सकलं दृष्टं न प्राप्तो रसतस्करः परं तु तद्विको नभाः पाताले ऽपि न दृश्यते ॥ स एव हृतवान्किं वा कार्ये
१५२ संप्रति तत्र कः इत्यावां नैव जानीवस्त्वयेदमवधार्यतां ॥ इंद्रोपि तद्वचः श्रुत्वा मायया पुरुरूपभाक् ददर्श
सर्वतस्तेन मदृष्ट्वा गुरुमब्रवीत् ॥ ॥इंद्र उवाच॥ न जानेहं गुरो क्व त्वं कस्य जातमलौकिकं मया तु सर्वतो दृष्टं त्व
मिदानीं विचारय ॥ ॥बृहस्पतिरुवाच॥ जानेहं तत्तक्षकस्यैव कर्मेदमिति निश्चितं तथापि स लभ्यो नायं यतस्तीर्थे
न स ताश्रयः ॥ पीतं तत्तक्षकेनैव सो ऽवध्योस्ति च भूतले ॥ अक्षय्यवटमध्यस्थो ऽसौ तत्र राजस्य मंडले ॥ सर्वदा माधवं
ध्यायन्वर्तते यामुने ह्रदे तत्क्षेत्रस्य निवासेन न स वध्योस्ति कस्यचित् ॥ यथोपरम्यतामिंद्र त्वयेताभ्यां च सर्वे
प्या भवतामुद्यमो मोघः सर्वथैव भविष्यति ॥ भूयः संपादयध्वं तं रसराजं यथाविधि किंवर्थेनाग्रहेण स्या
दतो भवत निश्चलाः ॥ गुरोर्वचनमाकर्ण्य त्रयोपींद्रादयस्तदा त्यक्त्वाशां सदनं स्वं स्वं जग्मुर्म्लानमुखश्रियः
॥ तदारभ्य प्रसिद्धं तत्तक्षकं कुंडमुत्तमं सर्वपापप्रशमनं सर्वोपद्रवनाशनं ॥ सर्वस्यां शुक्लपंचम्यां मा

MEMORIAL

र्गशीर्षे ऽवरणयोः परं यः स्नायात्तक्षके कुंडे विषबाधा न तत्कुले ॥ यः स्नात्वा तत्र कुर्वीत स्नानं दानं जपादि
कं तक्षकेश्वरपूजां च धनवान्स भवेत्सदा ॥ एवं तक्षकतीर्थस्य माहात्म्यं गदितं मया तीर्थांतरमथो व
क्ष्ये शृण्वंतु सनकादयः ॥ ॥इति श्रीप॰प्र॰ तक्षककुंडमहिमावर्णनं नाम द्व्याशीतितमो ऽध्यायः॥ ॥ ॥शेष उ
वाच॥ कालियस्य ह्रदो प्यास्ति तस्यैव निकटे महान् सर्वरोगहरः पुण्यः सर्वपापप्रणाशनः । यमाश्रित्य सुखेनाप
कालियस्तार्क्ष्यपीडितः त्यक्त्वा रमणकद्वीपं सुखं स्वापसानुगः ॥ तत्र स्नांति नरा ये च पूजयंति च कालियं स
र्वबाधाविनिर्मुक्ता बलवंतो भवंति ते ॥ स्नानं दानं जपं होमं स्वाध्यायं पितृतर्पणं कुर्वतामेधते तस्मिन्नैहिकामु
ष्मिकं फलं ॥ ॥सनकादय ऊचुः॥ द्वीपं रमणकं रम्यं कुतस्त्यक्त्वा जगाम कालियः गरुडेन विरोधश्च कुतो ऽभूदनेन हि
॥ एतन्नः सर्वमाचक्ष्व कृपया धरणीधर एतस्य श्रवणे ऽस्माकं परमाश्चे कुतूहले ॥ ॥शेष उवाच॥ कश्यपस्य उभे
भार्ये कद्रूश्च विनता तथा कद्रूः संतानसंपन्ना विनता न तथा पुनः ॥ संतानगर्विता कद्रूर्विनतामवजानती आ
सीत्तां विनतापुत्रौ द्वावेव गरुडारुणौ ॥ विनता सर्वदा गेहे पुत्रचिंतासमाकुला तिष्ठति म्लानवक्त्रा सा पतिसेवा
परायणा ॥ कदाचिद्वैनतेयो ऽसौ मातुरंतिकमागतः पप्रच्छ मातरं किं त्वं भासि चिंतासमाकुला ॥ इति पुत्र

वचःश्रुत्वाविनताचावदुःखिता गरुत्मन्तंततेदुःखाद्दुःखमन्यत्तयोषिता । त्वंज्येष्ठोममपुत्रोसिपक्षीतियं
अ॰शा॰
करोमिकिं अनूरुस्त्वापरःपुत्रइतिचिंताकुलास्म्यहं । सपत्न्याबहवःपुत्राःकाद्रवेयामहाबलाः श्रेष्ठाःप्र
तापसंपन्नाःसंतिसर्पामहाभयाः । इतिमातृवचःश्रुत्वादुःखितामवलोक्यतां उवाचसत्वसंपन्नोगरुत्मान्मात
रंवचः । ॥गरुडउवाच॥ किंजातैर्बहुभिःपुत्रैर्मातःसंतापकारकैः वरमेकःकुलालंबीयेनख्यातिंलभे
त्कुले । मत्समःकोस्तिहेमातःसर्वब्रह्मांडगोलके त्वमद्यमेबलंपश्यदर्शयेतवतुष्टये । इत्युक्त्वोड्डीय
सहसाखंजगामखगेश्वरः पक्षाभ्यामीरयन्वायुंस्वसामर्थ्यंप्रदर्शयन् । गरुडस्यवातमात्रेणत्रयोलोकाः
प्रकंपिताः प्रकंपितामहीसर्वासशैलवनकानना । गगनेनष्टचंद्रार्कज्योतिर्नैवप्रकाशते देवताभयभीता
श्चमारुतोपिप्रवातिन । सूर्योविपतितश्चाभ्रमवंदस्यच्चलितःपदात् भूचराणिनदृश्यंतेखेचराणिकृताःपु
नः । पिनाकीसपरीवारःस्वकंदर्यांव्यलीयत ब्रह्माजलनिधौमग्नोहूचमौलिंव्यकंपयं(?) । एवंजगद्व्यतिक
रंकुर्वन्नागांतकोययौ क्षीराब्धिशायनेविष्णुंसर्वानगणयन्बलात् । भगवानपितंदृष्ट्वाकाश्यपेयंमहाब
लं उत्थायपुयुधेतेनज्ञात्वातद्विक्रमावधिं । फटात्कारेणतंदूरेचकारगरुडस्तदा निरायुधैर्महाविष्णुं

युयुधेतेनमुष्टिभिः । चिरकालमभूद्युद्धंविष्णुनागरुडेनवै खगेंद्रःप्रापकिमपिनचापिनपराजयं ।
तच्चात्तस्यबलंदृष्ट्वातुतोषभगवान्हरिः उवाचचवचोरम्यंकरुणुप्रसादरं । ॥श्रीभगवानुवाच॥ धन्योसि
विनतापुत्रसंमतोमेपराक्रमे तुष्टोहंतवयुद्धेनवरंवरयकांक्षितं । धन्येयंविनतासाध्वीययाकुक्षौ
तोभवान् एकोपितादृशःपुत्रोवरंनबहवोपरे । ॥गरुडउवाच॥ योयंविजेतिसंग्रामेतस्मैदत्तेवरंतुसः
अतस्त्वमेववजेतारंमांयाचयपरंवरं । ॥श्रीभगवानुवाच॥ सत्यमेतादृशोसित्वंविक्रमेणबलेनच ममभारवं
हयानंभवत्वंविनतासुत । श्रावयच्छ्रभवेत्तुष्टैतमोमिनिवदन्खगः स्वपृष्ठेतंमहाविष्णुंसलक्ष्मीकमुवा
हसः । कुत्रयामीतितेनोक्तेविष्णुस्तमवदद्वचः स्वगृहंनयमांभद्रविनतातोषकारणात् । इतिश्रुत्वा
वचोहृष्टस्तदालक्ष्मीपतेःशुभं स्वस्तुत्यपातगरुडःस्वगृहाभिमुखंययौ । एतस्मिन्नंतरेश्रुत्वाविनतातत्र
निरखने ददृशेपुत्रमायांतंसलक्ष्मीपतिकंपुरः । ततोदृष्ट्वाघनश्यामंपीतकौशेयशोभितं चतुर्बाहुंविशा
लाक्षंशंखचक्रादिभूषितं । प्रसन्नवदनंविष्णुंवामांकस्थश्रियायुतं पतित्वादंडवद्भूमावुत्थायप्रांजलिः
स्थिता । विनतानुनतद्वाक्यांप्रांजलिंपुरतःस्थितां भगवान्प्राहतेपुत्रोजेतामेविनतेभवत् । अमुनामे

प॰ श्री॰ वरोदत्तो मया ॥ वाहनेन्वृतः अद्यप्रभृति मम स्वपुत्रं त्वं विनते मम वल्लभं ॥ ॥विनतोवाच॥ धन्या माता पिता
१५५ धन्यो धन्यं धनं कुलादिकं तस्य यस्य कुले भाग्यात् जायते वैष्णवः सुतः ॥ अयं तु त्वां सपत्नीकं पृष्ठे नो वा
हमत्सुतः श्रुतो नेनाद्य भगवन्पावितं काश्यपं कुलं ॥ यो मम स्वपुत्र विरहाद्यः शोको मय्यभूत्पुरा अद्य
योग्यतमं पुत्रं ज्ञात्वा स विलयं गतः ॥ किमत्र कार्यमेतस्य सर्वदा स्तुतिं वा तिके उच्छिष्टभुग्भवद्द्वारे से
वाकारी वतिष्ठतु ॥ वैनतेयं वचः श्रुत्वा प्रसन्नो भगवांस्तदा वैकुंठभवनं जग्मो गरुडाधिष्ठितो विभुः
॥ तत्र गत्वाथ भगवान्गरुडं परया मुदा स्वतोरणे प्रतिष्ठाप्य मंदिरं स्वयमाविशत् ॥ नाना महेश्वभोजै
श्च विष्णुनिर्माल्यधारणैः परानंदमनुप्राप्तस्तस्थौ तत्रैव काश्यपिः ॥ कदाचिदागतस्तत्र नारदो भगवत्प्रि
यः भ्रमन्सर्वेषु लोकेषु भगवद्दर्शनोत्सुकः ॥ तं दृष्ट्वा गरुडस्तूर्णं समुत्थाय ननाम च नारदो गरुडं दृ
ष्ट्वा वचनं समवोचत ॥ ॥नारद उवाच॥ गरुत्मन्दुर्बलः कस्मात्दृश्यसे कारणं वद वैकुंठे वसतिस्तेत्र १५५
तार्क्ष्य हे न संशयः ॥ ॥नारद उवाच॥ भूमंडलादहं यातस्तत्रैकं दृष्टमद्भुतं सर्वलोकास्तव भ्रातॄन्पूजयंति

फणीश्वरान् ॥ अपदोपि हि पूज्यंते स्वश्रोत्रैः फणिनः कथं न वपूजां न कुर्वंति कारणं तत्र किं वद ॥
॥गरुड उवाच॥ अकृतोपद्रवः कश्चिन्महानपि न पूज्यते अत्रेदमेव जानीहि कारणं मुनिपुंगव ॥ ॥ना
रद उवाच॥ तव भागोपि तत्रैव दीयते सकलैर्जनैः भ्रातॄभ्यो यत्परैर्दत्तं सर्वेषां तत्समर्पयतः ॥ ॥गरुड
उवाच॥ मम भागं न यच्छंति कस्मात्गृह्णंति भोगिनः गच्छामि भूतलं शीघ्रं भागं गृह्णामि तं मुने ॥ इत्यु
क्त्वा गरुडः शीघ्रं गत्वा पन्नगसन्निधिं स्वीयं भागं ययाचे तान्न ते पितस्मै ददुस्तु तं ॥ तत्रैकः कालियो ना
गो नदर्दौ बलवत्तरः युयुधे गरुडस्तेन पराजित्य बबंध तं ॥ ततस्थलेन निष्क्रम्य कालियो सोपला
यितः यातः प्रयागं यमुनाह्रदे लीनो व्यतिष्ठत ॥ अदृष्ट्वा कालियं पश्चात्गरुडो न्विष्यतं बहु तीर्थरा
जाश्रितं ज्ञात्वा जगाम हरिसन्निधिं ॥ तदारभ्य प्रसिद्धोयं प्रयागे कालियो ह्रदः उक्तमेतस्य माहात्म्यं
तीर्थांतरमथोच्यते ॥ ॥इति श्रीप॰ प्र॰ कालियतीर्थवर्णनं नाम अशीतितमोध्यायः॥ ॥ ॥शेष उवाच॥
तस्यापि पश्चिमप्रांते चक्रतीर्थमनोरमं सर्वबाधाप्रशमनं सर्वारिष्टनिवारणं १ गत्वा परमया भक्त्या त
त्र यः स्नाति मानवः चक्रो दिव्यवपुर्भूत्वा स गच्छेद्वैष्णवं पदं २ यत्किंचित्क्रियते तत्र दान होम जपादिकं यः

करोति स धर्मात्मा वांछितं लभते फलं २ सुदर्शनस्य मंत्रस्य यः कुर्यात्तत्र वै जपं तत्प्राधीनं भवेन्मंत्रं सर्व
कार्यार्थसाधकं ३ तत्पश्चिमे परं तीर्थं प्रसिद्धं सिंधुसागरं सर्वाघनाशनं पुण्यं वर्तते सनकादयः ४ त
प्र·श· त्र ये स्नांति मनुजाः सिंधुसागरसंगमे ते विध्वस्ताखिलाघौघा यांति विष्णोः परं पदं ५ यत्किंचिदपि सत्कर्म
१५६ तत्र यत्क्रियते नरैः तत्तीर्थस्य प्रभावेन तत्सागरवद्वर्धते ६ तदुत्तरे परं तीर्थं पांडवैर्यद्विधिष्ठितं पंचानां
सुखदं यस्मात्तस्मात्तत्पांडवं ७ पंचापि पांडवास्तत्र चक्रिरे स्वाश्रमं मुदा तत्तीर्थस्य प्रभावेन लेभि
रे स्वमनोगतं ८ राज्यं प्राप्तं यशो जातं रिपूणां मरणं तथा कृष्णस्य दर्शनं नित्यं तत्तत्रास्य प्रभावतः ९ स्ना
त्वा पांडववर्त्मपि ये संस्थिताः पांडवैः सह गोविंदस्मरणे भक्त्या कुर्वंत्येते च्युतक्रियाः १० स्नानदानादिकं ये तत्र यत्किं
चिदपि कुर्वते पूजनं पांडवानां च तत्तेषामक्षयं भवेत् ११ तदुत्तरे शिव वरुणस्याश्रमः प्रागुदाहृतः ऋषि
सिद्धसुरैर्जुष्टः सर्वकामफलप्रदः १२ स्नात्वा वै वारुणे कुंडे वरुणं पूजयंति ये दानं च कुर्वते शक्त्या लभंते
ते मनोगतं १३ ऋषीणामाश्रमाः पुण्या बहवस्तत्र संति वै तेषां प्राधान्यतो वक्ष्ये पुण्यान्येषां विदाश्रमान् १५६
१४ वरुणस्योत्तरे भागे वर्तते कश्यपाश्रमः नानावृक्षलताकीर्णो दर्शनानंदवर्धनः १५ कश्यपोत्र तपस्तेपे

सृष्टिकामः पुरानघाः तत्प्रभावाच्चकारासौ ततः सृष्टिं च काश्यपी १६ तत्र गत्वा तु ये लोकाः पूजयंति च क
श्यपं अविच्छिन्ना भवेत्तेषां पुत्रपौत्रादिसंततिः १७ एकरात्रं द्विरात्रं वा त्रिरात्रं वापि ये नराः तत्र वासं प्रकुर्वं
ति ते हि दुःखसंकटस्थिताः १८ सिद्धेश्वराश्रमोऽस्यास्ति रविदूरे तदुत्तरे यत्रानसूयया सार्धं वर्ततेत्रिः स्वभार्य
या १९ पुरा तत्र तपस्तेपे स चिरं पुत्रकाम्यया तं तेभ्यो माधवादिभ्यो दत्त्वा दीनापसत्सुतान् २० अतस्तदाश्रमे
सत्पुत्रमिच्छंस्तपश्चरेत् अचिरात्तत्प्रसादेन स सत्पुत्रमवाप्नुयात् २१ यो नरः पूजयेदत्रिं स्नानं कृत्वा यथा
विधि दद्यात्तत्र यत्किंचित्सोपि तेऽभूममवाप्नुयात् २२ तदुत्तरे तिरस्यास्ति भरद्वाजाश्रमो महान् तपः कृत्वा पुरा
यत्र तपःसिद्धिमवाप्तवान् २३ प्रागासीत्तत्कलर्षिभ्यो भरद्वाजाश्रमे नघाः समायातस्तत्स्थानेकृष
यः कश्यपादयः २४ भरद्वाजेश्वरस्तत्र स्थापितो मुनिना मुना तयो दर्शनमात्रेण कल्पितं जायते फलं २५ पूज
येन्नित्यमान्यस्तु भारद्वाजं महेश्वरं सर्वान्कामानवाप्नोति भरद्वाजप्रसादतः २६ प्रयागमागतो यस्तु भारद्वा
जं न गच्छति तस्य यात्राफलं न्यूनं जायते नात्र संशयः २७ त्रिरात्रमेकरात्रं वा तत्र वासं करोति यः जपादि नि
रतो भक्त्या कामान्नाप्नोति पुष्कलान् २८ तस्योत्तरे विविधं द्रुः सीताराम्नाश्रमो महान् यस्य दर्शनमात्रेण जा

पतेरामवल्लभः ४९ यदादाशरथीरामोसीतालक्ष्मणसंयुतः प्रवेष्टुं दंडकान् जग्मोसाकेतात् गुर्वनु
प्र॰ श्री॰ तया ५० तदागत्यात्रैवरामोभरद्वाजस्यसन्निधौ स्थित्वातदातूयापश्चात्चित्रकूटंगिरिंगतः ५१ तदार
१५७ भ्यात्रविख्यातःसीतारामाश्रमःकिल कामितार्थप्रदःपुंसांसर्वपापविनाशकृत ५२ तत्रगत्वाचयेरामं
सीतालक्ष्मणसंयुतं पूजयंतिनरानार्योयांतितेरामसन्निधिं ५३ विश्वामित्राश्रमस्तस्याप्युत्तरेवर्ततेमहा
न् तस्मिन्नाश्रमनमात्रेणपापंनश्यतितत्क्षणात् ५४ येर्चयंतिनराभुक्त्याविश्वामित्रंमहामुनिं सर्वान्कामान
वाप्यांतेब्रह्मलोकंव्रजंतिते ५५ तत्राचरंतिगायत्र्याःपुरश्चरणमुत्तमं येतेपापविनिर्मुक्ताःप्रयांतिब्रह्मणःप
दं ५६ तस्याप्युत्तरतःकुंडेवर्ततेगौतमाश्रमः साहल्याक्लिष्टतेयत्रगौतमोखिलशर्मकृत ५७ तत्रागत्यंति
येलोकाःप्रजयंतिस्तुवंतिच गौतमस्यप्रसादात्तेयास्यंतिगतिमुत्तमां ५८ तस्योदगाश्रमस्तस्यजमदग्ने
र्महामुनेः रेणुकासहितोयत्रजमदग्निर्विराजते ५९ तंपूजयंतियेलोकाभक्त्यानानोपसाधनैः प्रसन्नो १५७
जायतेतेषांजमदग्निःसरेणुकः ६० तत्रवासात्जपात्दानात्तनमनात्पूजनादिभिः लभंतेवांछितंलोका
इहामुत्रचनिश्चितं ६१ वसिष्ठस्याश्रमःपुण्यस्तस्याप्युत्तरतोमहान् अस्तियत्रसपत्नीकोवसिष्ठोमुनिसत्त

मः ६२ तत्रगत्वाचयेलोकाएकद्वित्रिदिनोषिताः नमंतिपूजयंत्येनंजीवन्मुक्ताभवंतिते ६३ यत्किंचि
त्सुकृतंतत्रकृतमल्पमपिभक्तितः स्नानदानजपार्चादितदानंत्यायकल्पते ६४ वरुणाश्रममारभ्ययावद्वाय
वमंडलं ऋषीणामपरेषांचसंत्यष्टाशीतिसहस्राः ६५ मिल्काशोवर्णनेतेषांकःकल्पःसनकादयः नमस्कु
र्यात्तत्तेभ्योभक्तिमान्यात्रिकोनरः ६६ एवंपश्चिमतीर्थानिकथितानियथामति। वक्ष्येथोत्तरतीर्थानिशृणु
ध्वमवधानतः ६७ ॥ इतिश्रीप्र॰ प्रवर्ली[illegible]ानरामचतुःषष्टितमोध्यायः ॥ ६४ ॥ श्रीगुरुवाच ॥ अथवरु
णमण्डलवक्ष्येवायुमंडलपूर्वतः विजयैश्वर्यदंपुंसांसर्वशत्रुविनाशनं १ प्रयागेदानमाहात्म्यंश्रुत्वातत
फलाप्तितं इंद्रःकदाचिदागत्यहृदयदानेमतिंदधौ २ उच्चैःश्रवसमानीयहृदयरत्नपुरंदरः प्रदादातंमन
श्चक्रेतदावि[illegible]विघ्नयत ३ अश्वदानेसमारब्धेब्रह्माद्यादेवतास्तदा गुरुंप्रणम्यपप्रच्छुर्हयदानस्य
कारणं ४ ॥ ब्रह्मादयऊचुः ॥ मरुत्वान्दानशूरोभूत्प्रयागेभगवन्कुतः तत्सर्वंवदचास्माकंयेननश्येतनो
भयं ५ दशधेनुसमोनड्वान्दशभिस्तैःसमोहयः तंप्रयागेतुयोदद्यान्मत्पदंतत्करेस्थितं ६ स्वपदच्यु
तिभीतोहंपृच्छामित्वांबृहस्पते निश्चित्यमनसासर्वंसाध्वसंमेनिवारय ७ ॥ गुरुरुवाच ॥ बहुधामाधवप्रीत्यै

नपदंप्राप्नुयेतव प्रयागेमघवाब्रह्मन्स्वर्गप्रदातृं समुद्यतः ॥ गौरवीवाचमाकर्ण्य संदिह्मानस्तथाप्य
प्र॰ श॰ सौ कथंचित्संभययामास ब्रह्मास्त्रेमनविद्यया ॥ ततोसौ जडतांप्राप्तः समर्थोपीन्द्रकाशिराट् तथाभूतेन
१५८ मालस्य पत्रेशेद्रोपिवाक्पतिं ॥ इंद्र उवाच ॥ समानीतो मयादातुं माधवप्रीतये हयः पदमात्रं न चल
ति प्रयागे सोकृतो वद ॥ गुरुरुवाच ॥ यथा भूपोष्टवसुपा शक्रयज्ञाश्वो मुषितः पुरा तथाधात्रापि दानाश्व
स्तवायं स्तंभितो बलात् ॥ तस्मादुपरमस्व त्वं प्रयागे हयदानतः श्रीत एवास्ति ते शक्र माधवो भक्तवत्सलः
॥ प्रयागेल्पं च यद्दानं पुण्यातिशयकारकं त्वहं स्तविभेति मघवन्नेनस्मात्स्वपदच्युतेः ॥ एकेनैवाश्वदाने
न प्राप्यते ब्रह्मणः पदं एकेनैवाश्वमेधेन पुरुहूतपदं व्रजेत् ॥ एकेन धेनुदानेन लक्षगोदानजं फलं
एकेन वृषदानेन कैलासे वसते नरः ॥ एवं सर्वाणि दानानि प्रयागे तु शताधिकं फलं यच्छंति देवेंद्र विर
घ्नं कुर्वंत्यतो मराः ॥ येत्र दानं कर्तुकामस्तामन्यत्र नयंति ते कारयंति च दानानि तीर्थे वासव भंगुरे ॥ मा
धवीया कृपायास्मिन्परिपूर्णा भविष्यति दानं घटे तस्यैव प्रयागे माधवप्रिये ॥ शेष उवाच ॥ इति वाक्यं गु १५८
रोः श्रुत्वा प्रसन्नहृदयांबुजः इंद्रो निवर्तते दानात्प्रीत्या चात्मभुवस्तथा ॥ तदारभ्य हरेस्तत्र वर्तते संमि

॥

तो हयः तस्य पूजनमात्रेण संप्रीणाति शचीपतिः ॥ परिक्रमंति ये लोकाः पूजयित्वा तु तं हयं अश्वशि[illegible]
कृतं ज्ञेयमेतैरवनिमंडले ॥ तस्यैव निकटे पूर्वे वृषरूपोस्ति धर्मराट् तस्य दर्शनमात्रेण [illegible]
धर्मिष्ठो जायते नरः ॥ तं ये चर्चयंति मनुजा धर्मराजं यतव्रताः वांछितं फलमायाति धर्मस्तेभ्यः प्रसीदति ॥
तस्यापि पूर्वदिग्भागे वासुकेरुत्तरे तथा अस्ति भोगवती तीर्थं दर्शनादघनाशनं ॥ यदास्ति माधवाभ्यासे सर्वे
पातालवासिनः समायातास्तदासापि समायाता धरातलात् ॥ सनकादय ऊचुः ॥ कस्मात्भोगवतीत्याख्यां
प्राप सा नागराट्प्रभो तन्नः कथय बोधाय बहुधार्था याति पुण्यतां ॥ शेष उवाच ॥ यदा निपतिता गंगा
स्वस्था पातालमागता ममभोगे मुनींद्राः सा तस्मात्भोगवती स्मृता ॥ स्वर्गे मंदाकिनी प्रोक्ता मंदगत्वाप
ताकिनी गां गता गीयते गंगा तस्मात्त्रिपथगा स्मृता ॥ भगीरथसमानीता प्रोक्ता भागीरथीति च जह्नुपीता
परित्यक्ता जाह्नवीति च गीयते ॥ विष्णुपादप्रसूतत्वाद्वैष्णवीति च कीर्त्यते इत्यनेकाभिधेयासावस्मत्तो ब्रह्म
रूपिणी ॥ एवं भोगवती तीर्थं वर्तते कामितप्रदं तत्र स्नात्वा च पीत्वा च सर्वान्कामानवाप्नुयात् ॥ यत्किं
चित्सुकृतं कर्म कृतं भोगवती ह्रदे स्नानदानजपार्चादि तदक्षय्यमुदाहृतं ॥ तस्याभ्यासे परं पुण्यमस्ति वा

प॰त्री॰ सुकिमंडलं ममस्थानं च तत्रैव वर्तते सनकादयः ॥ पुरा तत्र तपस्तेपे दिवोदासो महातपाः षष्टिवर्ष
१५९ सहस्राणि मदाराधनतत्परः ॥ प्रादुरासमहं तत्र फणामंडलमंडितः दृष्ट्वा तु एवमहं तत्र दिवोदासः कृतां
जलिः ॥ ॥दिवोदास उवाच॥ नमामि त्वां शाश्वतं शेषराजं विश्वोत्पत्तिस्थानसंहारहेतुं नागेशं त्वां सर्पं
नाथं ह्यनंतं सर्वाधारं वासुकिं त्वां नमामि ३७ फणिफणीद्रं फणिनां गणेशं फणातपत्रं फणराजि
राजितं फणासहस्रस्य किरीटशोभितं तं वासुकिं देवमहं प्रपद्ये ॥ बिभर्ति यं वै शिरसा महेशो बि
भर्ति यं वै सततं गणेशः नमंति यं वै दिनकृत्सुरेशास्तं वासुकिं त्वामहमानतोस्मि ३९ येदेहभाजो प्रण
धाय कुंडली नाडी सुषुम्णा कुंडलिनीति गीयते कुर्वंतु पर्यस्य बलेन योगिनो योगस्य सिद्धिं तमहं नतोस्मि
४० अभिनवतररूपं गूढपादं फणींद्रं स्तनयनश्रुतियुक्तं रम्यातकाकोदरं तं अविदितगतिमंतं सर्पराजं
हि जितं सकलभुवनवीरं वासुकिं त्वां नतोस्मि ४१ स्तुवतीति दिवोदासे सुप्रसन्नः कृतांजलौ स्तोत्रेण
परभक्त्याहमब्रोचमनघा इति ॥ वरं ब्रूहि वरं ब्रूहि त्वं दिवोदास सत्वरं सर्वार्थसाधनं ब्रूहि यत्तेमन
सि वर्तते ॥ ॥दिवोदास उवाच॥ यदि प्रसन्नो भगवान्भवान्सर्वार्थसाधकः वाराणस्याधिपत्यं मे

MEMORIAL

चलं देहि पतं जले ॥ न पेतुर्नोमया पश्चाद्दिवोदासो महीपतिः काश्यां गत्वा प्रजाः सर्वा धर्मे
णापालयच्चिरं ॥ तस्य वै पौरुषं बलं नको पि भुवने प्रभुः विश्वेशोपि गतो दूरं विहायानंदकान
नं ॥ एवंविधमिदं क्षेत्रं वासुकेर्मम च प्रियं त्रिंशद्दंडात्मकं श्रेष्ठं नानानागगणान्वितं ॥ यः
स्नात्वा मामके कुंडे वासुकिं मां प्रपूजयेत् प्राप्नोति सकलानर्थानिहत्रेत्य दिवं व्रजेत् ॥ श्रा
वणे शुक्लपक्षे ये पंचम्यां यात्रिका जनाः पूजयंति विशेषेण तेषां तुष्टो भवाम्यहं ॥ स्नानदानादि
कं तत्र कुर्वतामखिले कुले अस्मज्जातिकृता बाधा न भवेदिति शासनं ॥ उक्तराव धिभूतं तन्त्रयाग
स्य मुनीश्वराः वर्णितं वासुकिक्षेत्रं मया न्यदपि वच्मि वः ॥ ॥इति श्रीप॰ त्रि॰ तीर्थावलीवर्णने पं
चाशीतितमोध्यायः॥ ॥ ॥शेष उवाच॥ ॥गंगायाः पश्चिमे तीरे वासुकेर्दक्षिणे शुभं आधिव्याधि
हरं पुण्यं ब्रह्मकुंडं विराजते ॥ ब्रह्मणा निर्मितं कुंडं ब्रह्महत्यानिवारणं ब्रह्मणाधिष्ठितं शश्वत्सर्वका
मकरं डकं ॥ तत्र स्नात्वा च ये लोकास्तर्पयंति स्वकान्पितॄन् तदैव पितरस्तेषां गच्छंति ब्रह्मणः पदं ॥
स्नानहोमतपोदानजपस्वाध्यायपूजनं भक्त्या कुर्वंति ये विप्रा ब्रह्मलोके वसंति ते ॥ तस्य दक्षिणे

प्र॰श॰ ८०

दिग्भागे त्रिषु लोकेषु विश्रुतं दशाश्वमेधिकं तीर्थं वर्त्तते पापनाशनं ॥ यस्मिन्नेकगुणं पुण्यं दशघ्ना
विवर्धते पापं प्रशममायाति वाङ्मनःकायसंचितं ॥ अन्यत्र शतयज्ञैर्यन्नरैः फलमवाप्यते तदत्रैकेन
यज्ञेन प्राप्यते सकलं फलं ॥ अत एव पुरा तत्र वाजिमेधाः कृता दश ब्रह्मणा देवमुख्येन तेन ख्यातं
तथैव तत् ॥ दशाश्वमेधिके तीर्थे वैशाखे मासि यो नरः नियतं प्रत्यहं स्नाति सोऽश्वमेधफलं लभेत् ॥
यस्य कस्यापि धान्यस्य तुलां तत्र करोति यः सुवर्णतुल्यं पुण्यं भक्त्या प्राप्नोति मानवः ॥ दशाश्वमेधि
के तीर्थे पंच यज्ञान्करोति यः पंचाश्वमेधजं पुण्यं प्राप्नोत्यत्र न संशयः ॥ धनुःशतमिते तस्मिन्देहत्यागं करो
ति यः न वै स पुनरायाति संसृतिं सनकादयः ॥ स्नानात्तर्पणतो दानाद्धोमात्स्वाध्यायतो जपात् असंख्य
सुकृतं यत्र प्राप्नोति श्रद्धया जनः ॥ प्रातः स्नात्वा विधानेन गंगायमुनसंगमे तत्र माध्याह्निकं कृत्वा सर्व
पापैः प्रमुच्यते ॥ यात्रार्थमागता ये च प्रयागे सकला जनाः दशाश्वमेधे न स्नांति व्रतास्ते भयः प्रकुप्यति ॥
तस्यैव पश्चिमे भागे शिवस्थानमनुत्तमं तत्र गत्वा शिवं भक्त्या तत्तीर्थेशं नमंति ये ॥ पूजयंत्युपचारैश्च ८०
बिल्वपत्रादिभिः शुभैः तेषां यात्राफलं पूर्णं जायते नात्र संशयः ॥ गंगायाः पश्चिमे भागे लक्ष्मीतीर्थं

तदंतिके तपस्तप्त्वा पुरा यत्र माधवं प्राप वल्लभं ॥ लक्ष्मीतीर्थात्परं तीर्थं लक्ष्मीप्राप्तिकरं न
हि स्नानपूजनदानाद्यैर्गृहे लक्ष्मीश्चिरायते ॥ तीर्थं महोदधेस्तस्य दक्षिणे स्तिमलापहं तस्य
दर्शनमात्रेण सर्वं नश्यति संकटं ॥ जगन्नाथगताः सर्वे तीर्थराजे समागताः तदारभ्य शतस्तत्र
तिष्ठंत्येवाभिलाषुकाः ॥ महोदधौ स्नानपानाद्देवर्षिपितृतर्पणात् सर्वपापविशुद्धात्मा याति वै
विष्णोः परं पदं ॥ यत्किंचित्कुरुते दानं नरो भक्त्या महोदधौ तस्य तद्दानजं पुण्यं प्रलयेऽपि न नश्य
ति ॥ तस्य च दक्षिणे भागे ह्युर्वशीकुंडमुत्तमं वर्तते मलपानीयं महर्षिसिद्धसेवितं ॥ तत्र स्नानाच्च
पानाच्च देवर्षिपितृतर्पणात् यत्फलं समवाप्नोति तदन्यत्र सुदुर्लभं ॥ त्रिरात्रं पंचरात्रं वा सप्त
रात्रमथ त्रयः स्थित्वा स्नानजपादीनि कुरुते नियतव्रतः ॥ रूपवान्गुणवान्शूरो धनी भूत्वा स धा
र्मिकः उर्वशीसदृशीनां तु स्त्रीणां भवति वल्लभः ॥ अपरं चोर्वशीकुंडं यमुनादक्षिणे तटे विद्यते
सनिमित्तं तद्धि ख्यं मुनिपुंगवाः ॥ यत्र नालमपावस्य यस्माद्ब्रह्मा प्रजायते स्वलये लयमाप्नोति
संहृत्य सकलं जगत् ॥ तस्मात्तत्पावनं तीर्थं धनुर्विंशतिमंडले वासेनेष्टप्रदं नॄणां मरणान्मार

प्र·श णापहे ९० स्नानसंध्यार्चनाध्यायदानहोमादितर्पणैः अनंतं पुण्यमाप्नोति भक्तिमान्यात्रिकोन
रः ९१ एवमेतानि तीर्थानि वर्णितानि यथाश्रुतं यात्रामभीष्टां कृत्वा तु पुनर्वेण्यां व्रजेन्नरः ९२ तत्र स्ना
त्वा तथा कृत्वा वेणीमाधवपूजनं संप्रार्थ्य दंडवन्नत्वा ततो यात्रां निवेदयेत् ९३ एवं यः कुरुते यात्रां भक्ति
१६१ मान्यात्रिको नरः पादस्नाकल्पमासाद्य प्राप्नुयात्स महत्फलं ९४ ॥ क प ट स ऊ पु ॥ अत्यद्भुतानि तीर्थानि
निदेवतायतनानि च त्वन्मुखांभोजतः स्वायश्रुत्वानंदमुपागताः ९५ विधिना केन कर्तव्यो यात्रा
विधिरयं नृभिः तं वदस्व प्रबोधाय सर्वलोकोपकारक ९६ ॥ श्रीप उवाच ॥ सम्यक्पृष्टं मुनिश्रेष्ठाः भ
वद्भिर्लोकमंगलैः शृण्वंतु प्रणिधानेन तीर्थयात्राविधिं ब्रुवे ९७ दानाध्ययनसक्तानां जपध्यानरता
त्मनां नावश्यको सौ मुनयो तीर्थयात्राविधिः स्मृतः ९८ एतदर्थासमर्थानां रंकवैधेयरोगिणां तीर्थे ।।१४
वांतरतीर्थानां यात्रा प्रोक्ता मनीषिभिः ९९ पुण्यमासे मलेपक्षे स्वतिथौ शुभवासरे पर्वकाले च संक्रांतौ
मन्वादिषु युगादिषु १०० प्रातः स्नात्वा विधानेन गंगायमुनसंगमे निर्वर्त्य नित्यं नित्यमात्र पूजन १६१
साधनः १ श्रीमाधव दयासिंधो वांछितार्थफलप्रद अनुजानीहि मामद्य त्वत्तीर्थानां परिक्रमे २

न जाने तीर्थनामानि देवतायतनानि च अतः परिक्रमां कुर्वे त्वंतर्वेद्यां यथाक्रमं ३ इति संप्रार्थ्य म
तिमान्सपत्नीकोप्यवैकलः अव्रतानन्विकिरन्गच्छेदुक्तपूर्वप्रदक्षिणं ४ स्नायान्महत्सु तीर्थेषु गं
गायमुन[redacted]तीरयोः मार्जनाचमने कुर्यात्क्वचित्जाकृविक्लितः ५ दुष्टालापस्तथालापसंसाराला
पवर्जितः माधवं मनसाध्यायन्माधवेतीरयन्मुनः ६ यथा प्रागुक्ततीर्थानां भक्त्याकृत्वा प्रदक्षिणं पुनर्वेणीं
समासाद्य स्नात्वा सर्वं निवेदयेत् ७ माधवानंत गोविंद जगन्नाथ जगत्पते गृहाण मत्कृतां यात्रां फलदो भ १६५
वतेनमः ८ एवं यः कुरुते यात्रामंतर्वेद्यां यथाविधि अगण्यं पुण्यमाप्नोति माधवश्च प्रसीदति ९ तथा
ज्ञकृतपापानां स्नानेन विशुद्धये लघूनां हि विनाशाय वर्षे कुर्यात्प्रदक्षिणं १० तत्रस्थानां विधिश्चायं प्रा
यश्चित्तस्वरूपकः यात्रिकाणां यथाकालं तदभावे फलप्रदः ११ अंतर्वेदीस्थतीर्थानि तेषां यात्राविधिश्च
यः निरूपितो मुनिश्रेष्ठाः सर्वेषामुपकारकः १२ पद्मांकूर्णफलश्चायं मर्धादिर्वाह्नादितः असामर्थ्ये
द्विजाद्वासे संपूर्णे भृतिदानतः १३ अशक्तानां दरिद्राणां सर्वेषां पापसंभवे यात्राविधिं फलं पूर्णं यथा स्यात्
न्निबोधत १४ अरुणोदयवेलायां गंगायमुनसंगमे तीर्थानि देवतायतनानि स्नानुमार्ध्यति नित्यशः १५ अ
न

अ॰ पु॰ पातत्समयेतत्र स्नात्वा ध्यात्वाखिलानपि तदर्थं च पुनः स्नात्वा तीर्थयात्राफलं लभेत् ॥ अंतर्वेदी मुनिश्रेष्
१६२ ठाः सांगोपांगा निरूपिता अथो मध्यवदिष्ये यो वर्णयामि यथामति ॥ ॥ इति श्रीप॰ अ॰ अंतर्वेदी
र्थनिरूपणं षट्षष्टितमोध्यायः ॥ ॥ श्री ॥ ईश्वर उवाच ॥ ॥ मध्यवेद्यामथो वक्ष्ये मुख्यतीर्थानि सुव्रताः ये
षां दर्शनमात्रेण निष्पापः स्वर्दिवं व्रजेत् ॥ सेतस्याग्नेयदिग्भागे अंतर्वेद्याः अवाक्तटे सोमतीर्थमिति
ख्यातं सर्वलोकेषु पावनं ॥ यत्रागत्य पुरा सोमो पीडितो राजयक्ष्मणा शिवस्याराधनं चक्रे भक्त्या तदपनु
त्तये ॥ ततस्तत्तपसा तुष्टः शंकरो लोकशंकरः दत्वा यथेप्सितान्कामान्वचनं चेदमब्रवीत् ॥ अत्रिनेत्रस
मुद्भूत सोमास्मिन्तीर्थनायके मामुपासितवान्यत्वं कृतं ते नाहमागतः ॥ आजन्मविविधापापैः स्नात्वान्यत्रा
स्मदादयः उपासिताः प्रसीदंति न द्रागत्र तु मंदते ॥ अतस्त्वमप्यदो भक्त्या सेवस्वागतवत्सरः मां प्रतिष्ठाप्य
विधिवन्मंत्रं चेमं जपानिशं ॥ यत्र गंगा च यमुना यत्र प्राची सरस्वती यत्र सोमेश्वरो देवस्तत्र मामं मृतं हधी
॥ एवं कृते त्वयाभीष्टमखिलं सेत्स्यति ध्रुवं परं कामयमिदं स्थानं सर्वेषां च भविष्यति ॥ इति यावत्समाकर्ण्य १६२
शंकरी शंकरप्रियः शंभोर्लिंगं प्रतिष्ठाप्य सोमः सोमेश्वराभिधं ॥ तत्राश्रमपदं चक्रे माधवस्याप्यदूरतः

नानावृक्षलतैर्जुष्टं रम्यं नंदनसन्निभं ॥ तत्राश्रमे वसन्स्नात्वा प्रत्यहं च यथाविधि जजाप मंत्रमनि
शं शिवादिष्टं समाहितः ॥ द्विजानामोषधीनां च भूमिर्जादस्तथा तदादिख्यातिमायांतं तीर्थं सोमेश्व
राभिधं ॥ तस्मात्तत्र नरो गत्वा स्नात्वा सोमेश्वरं प्रभुं पूजयित्वा तिमनुजा यथोपकरणादिभिः ॥ रुद्रा
भिषेकं सूक्तानि शिवपंचाक्षरीजपं स्वाध्यायं ब्रह्मयज्ञं च दानं ब्राह्मणभोजनं ॥ ये कुर्वंति नरा भक्त्या तेषां
सोमेश्वराभिधः शिवस्तदेकतापन्नो माधवश्च प्रसीदति ॥ एकरुद्रा महारुद्रफलं तत्र प्रजायते शैव
मंत्रस्य सिद्धिः स्यात्सहस्रजपमात्रतः ॥ सोमवत्याममायां यः कुर्यात्सोमेशपूजनं स सोमयोगजं पुण्यं
प्राप्नुयान्नात्र संशयः ॥ इत्यादिगुणसंपन्नं सोमतीर्थं मुनीश्वराः वर्णितं मे ततोन्यानि वर्णयामि यथा
क्रमं ॥ पश्चिमे सोमतीर्थस्य सूर्यतीर्थमिति स्मृतं तत्र स्नानाच्च पानाच्च सूर्यलोके महीयते ॥ अस्ति ध
नदं तीर्थं कौबेरं तस्य पश्चिमे स्नानदानादिभिस्तत्र धनिनः स्युः पुनः पुनः ॥ तस्यापि पश्चिमे रम्यं वायुतीर्थं
वरप्रदं स्नातानां तत्र भूतानां वायुबाधा न जायते ॥ अथ तत्पश्चिमे वह्नितीर्थं परमपावनं स्नातो स्व
ति समस्ताग्निमिल्लोकं व्रजेन्नरः ॥ पश्चिमे धर्मराजस्य तीर्थं त्वनरकं स्मृतं स्नानाच्च तर्पणात्तत्र नर

केनचप्रपद्यते ॥२४॥ वारुणे तस्य विख्यातं वीरतीर्थं च वर्तते तत्र मज्जनतो जंतुर्लभते शूरवीरतां ॥२५॥ तदंति
प्र.पु. केवरी वर्त्ति प्रागुक्तो माधवाश्रमः स्नानपूजनवासाद्यैर्वैकुंठं तत्र गच्छति ॥२६॥ तस्याद्दूरे वरीवर्त्ति यामुनं तीर्थं
१६२ मुनीश्वराः तत्र स्नानार्चनाभ्यां च न याति यमसादनं ॥२७॥ तस्याविदूरे वारुण्यां रामतीर्थं विशारदं सीता
कुंडं ततः पश्चाद्धनूमत्तीर्थमुत्तमं ॥२८॥ यदा हि भगवान्विष्णुर्देवद्विजसुरेच्छया आविर्भूतो क्षितिः ॥१॥
ऐक्ष्वाकौ साकेताधिपतेः कुले ॥२९॥ रामलक्ष्मणशत्रुघ्नभरताख्याभिरन्वितः बाललीलारतस्तातो विश्वामित्र ॥१॥
क्रियान्वितः ॥ गाधिजानुचरे सोऽष्टस्त्रशास्त्रातिबलाबलः ताटकाजठरध्वंसी मारीचमाधिसताश्रमः ॥
क्रव्यान्निधननिर्विघ्नसमापिततदध्वरः मिथिलेशाध्वरालोकी कलितर्षिपदानुगः ॥ रुष्टगौतमसंश
प्तार्हल्योद्धारयशस्करः माहेश्वरधनुर्भंगप्राप्तसीतापरिग्रहः ॥ जामदग्न्यमदध्वंसी मातापितृप्रियं
करः ॥ स्वचक्रस्वनार्भयेरज्ञराज्यः सीतानुजान्वितः गुहोत्तीर्णमहागंगो भरद्वाजानुमोदितः ॥ तद्वेदि
ताखिलोदंतस्ताच्चित्रकूटतीर्णतारणिः चित्रकूटकृतावासो विहिताः स्वीयसांत्वनः ॥ प्रविष्टदंडकारण्यो १६२
विराधप्राणदारणः शरभंगस्तुतीक्ष्णंचाप्यगस्त्यं भाजि संस्तुतं ॥ दृष्ट्वा नत्वा कृताथित्योत गृहीतेद
२ मंथराशिष्टकैकेयीवाग्वद्धजनकेष्टकृत २

कार्मुकः प्रतिज्ञाताखिलवधः प्राप्तपंचवटीतटः ॥ तत्कृताश्रमवासी च राक्षसी नासिकाहरः खरत्रि
शिरदूषणघ्नो हतमायामृगः क्षणात् ॥ विज्ञाताखिलदुःप्रेक्ष्य प्राकृतं भावमागतः जटायुलब्धहतांतस्त
च्छारदूर्वाप्रतिवापसः तापर्यकः ॥ तदुक्तशबरीप्राप्तपंपायुग्युतान्वितः सुग्रीवकृतसौहार्दो तद्वालिकृतघातनः
स्वमुक्तिप्ररायकः ॥ तदुक्तशबरीप्राप्तपंपावायुपुत्रान्वितः सुग्रीवकृतसौहार्दो तद्वालिकृतघातनः
॥ हनूमद्विक्रमप्राप्तसीतोदंतः स्वसैन्ययुतः नलाब्धिबंधसंसेतुप्रोत्तीर्णलवणार्णवः ॥ विभीषणसखः
संख्ये घोरराक्षसमर्दनः स्वहस्तहतलंकेशो विभीषणवरप्रदः ॥ अंगीकृतावनिसुतो जीवितामृतक ॥१॥
वानरः विभीषणादिसंवीतः पुष्पकाधिष्ठितः स्वराट् ॥ यथागतं समायातो यमुनादक्षिणे तटे तत्रा
वतीर्य तैः सर्वैर्वेण्यां स्नात्वा प्रहर्षिता ॥ ब्राह्मणेभ्यो धनं भूरि ददुः सर्वे यदृच्छया सीता प्रास्तरणपत्नीभो
